# श्रीशिवशङ्कर एवम् यमभय निवारण स्तोत्रम्॥
## śrīśivaśaṅkara evam yamabhaya nivāraṇa stotram ||

अतिभीषणकटुभाषणयमकिङ्किरपटली
कृतताडनपरिपीडनमरणागमसमये।
उमया सह मम चेतसि यमशासन निवसन्
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ १॥

असदिन्द्रियविषयोदयसुखसात्कृतसुकृतेः
परदूषणपरिमोक्षणकृतपातकविकृतेः।
शमनाननभवकाननिरतेर्भव शरणं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ २॥

विषयाभिधबडिशायुधपिशितायितसुखतो
मकरायितमतिसन्ततिकृतसाहसविपदम्।
परमालय परिपालय परितापितमनिशं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ३॥

दयिता मम दुहिता मम जननी मम जनको
मम कल्पितमतिसन्ततिमरुभूमिषु निरतम्।
गिरिजासुख जनितासुख वसतिं कुरु सुखिनं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ४॥

जनिनाशन मृतिमोचन शिवपूजननिरतेः
अभितो दृशमिदमीदृशमहमावह इति हा।
गजकच्छप जनितश्रम विमलीकुरु सुमतिं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ५॥

त्वयि तिष्ठति सकलस्थितिकरुणात्मनि हृदये
वसुमार्गण कृपणेक्षण मनसा शिव विमुखम्।
अकृताह्निकमसुपोषकमवतात् गिरिसुतया
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ६॥

पितराविति सुखदाविति शिशुना कृतहृदयौ
शिवया सह भयके हृदि जनितं तव सुकृतम्।
इति मे शिव हृदयं भव भवतात्तव दयया
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ७॥

शरणागतभरणाश्रित करुणामृतजलधे
शरणं तव चरणौ शिव मम संसृतिवसतेः।
परिचिन्मय जगदामयभिषजे नतिरावतात्
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ८॥

विविधाधिभिरतिभीतिरकृताधिकसुकृतं
शतकोटिषु नरकादिषु हतपातकविवशम्।
मृड मामव सुकृतीभव शिवया सह कृपया
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ९॥

कलिनाशन गरलाशन कमलासनविनुत
कमलापतिनयनार्चितकरुणाकृतिचरण।
करुणाकर मुनिसेवित भवसागरहरण
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ १०॥

विजितेन्द्रिय विबुधार्चित विमलाम्बुजचरण
भवनाशन भयनाशनभजिताङ्गितहृदय।
फणिभूषण मुनिवेषण मदनान्तक शरणं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ ११॥

त्रिपुरान्तक त्रिदशेश्वर त्रिगुणात्मक शम्भो
वृषवाहन विषदूषण पतितोद्धर शरणम्।
कनकासन कनकाम्बर कलिनाशन शरणं
शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्॥ १२॥

॥ इति श्रीशिवशङ्करस्तोत्रम्॥

atibhīṣaṇakaṭubhāṣaṇayamakiṅkirapaṭalī
kṛtatāḍanaparipīḍanamaraṇāgamasamaye ।
umayā saha mama cetasi yamaśāsana nivasan
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 1।।
asadindriyaviṣayodayasukhasātkṛtasukṛteḥ
paradūṣaṇaparimokṣaṇakṛtapātakavikṛteḥ ।
śamanānanabhavakānananiraterbhava śaraṇaṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 2।।
viṣayābhidhabaḍiśāyudhapiśitāyitasukhato
makarāyitamatisantatikṛtasāhasavipadam ।
paramālaya paripālaya paritāpitamaniśaṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 3।।
dayitā mama duhitā mama jananī mama janako
mama kalpitamatisantatimarubhūmiṣu niratam ।
girijāsukha janitāsukha vasatiṁ kuru sukhinaṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 4।।
janināśana mṛtimocana śivapūjananirateḥ
abhito dṛśamidamīdṛśamahamāvaha iti hā ।
gajakacchapa janitaśrama vimalīkuru sumatiṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 5।।
tvayi tiṣṭhati sakalasthitikaruṇātmani hṛdaye
vasumārgaṇa kṛpaṇekṣaṇa manasā śiva vimukham ।
akṛtāhnikamasupoṣakamavatāt girisutayā
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 6।।
pitarāviti sukhadāviti śiśunā kṛtahṛdayau
śivayā saha bhayake hṛdi janitaṁ tava sukṛtam ।
iti me śiva hṛdayaṁ bhava bhavatāttava dayayā
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 7।।
śaraṇāgatabharaṇāśrita karuṇāmṛtajaladhe
śaraṇaṁ tava caraṇau śiva mama saṁsṛtivasateḥ ।
paricinmaya jagadāmayabhiṣaje natirāvatāt
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 8।।
vividhādhibhiratibhītirakṛtādhikasukṛtaṁ
śatakoṭiṣu narakādiṣu hatapātakavivaśam ।
mṛḍa māmava sukṛtībhava śivayā saha kṛpayā
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 9।।
kalināśana garalāśana kamalāsanavinuta
kamalāpatinayanārcitakaruṇākṛticaraṇa ।
karuṇākara munisevita bhavasāgaraharaṇa
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 10।।
vijitendriya vibudhārcita vimalāmbujacaraṇa
bhavanāśana bhayanāśanabhajitāṅgitahṛdaya ।
phaṇibhūṣaṇa muniveṣaṇa madanāntaka śaraṇaṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 11।।
tripurāntaka tridaśeśvara triguṇātmaka śambho
vṛṣavāhana viṣadūṣaṇa patitoddhara śaraṇam ।
kanakāsana kanakāmbara kalināśana śaraṇaṁ
śivaśaṅkara śivaśaṅkara hara me hara duritam ।। 12।।
।। iti śrīśivaśaṅkarastotram ।।

# शिवप्रातःस्मरणस्तोत्रम्॥
## śivaprātaḥsmaraṇastotram ||

प्रातः स्मरामि भवभीतिहरं सुरेशं

  गङ्गाधरं वृषभवाहनमम्बिकेशम्।

खट्वाङ्गशूलवरदाभयहस्तमीशं

  संसाररोगहरमौषधमद्वितीयम्॥ १॥

prātaḥ smarāmi bhavabhītiharaṁ sureśaṁ
  gaṅgādharaṁ vṛṣabhavāhanamambikeśam |
khaṭṭvaṅgaśūlavaradābhayahastamīśaṁ
  saṁsārarogaharamauṣadhamadvitīyam || 1||

प्रातर्नमामि गिरिशं गिरिजार्धदेहं

  सर्गस्थितिप्रलयकारणमादिदेवम्।

विश्वेश्वरं विजितविश्वमनोभिरामं

  संसाररोगहरमौषधमद्वितीयम्॥ २॥

prātarnamāmi giriśaṁ girijārdhadehaṁ
  sargasthitipralayakāraṇamādidevam |
viśveśvaraṁ vijitaviśvamanobhirāmaṁ
  saṁsārarogaharamauṣadhamadvitīyam || 2||

प्रातर्भजामि शिवमेकमनन्तमाद्यं

  वेदान्तवेद्यमनघं पुरूषं महान्तम्।

नामादिभेदरहितं षड्भावशून्यं

  संसाररोगहरमौषधमद्वितीयम्॥ ३॥

prātarbhajāmi śivamekamanantamādyaṁ
  vedāntavedyamanaghaṁ purūṣaṁ mahāntam |
nāmādibhedarahitaṁ ṣaḍbhāvaśūnyaṁ
  saṁsārarogaharamauṣadhamadvitīyam || 3||

## श्री शिवकवच स्तोत्रम्॥

## śrī śivakavaca stotram ||

अस्य श्री शिवकवच स्तोत्रमहामन्त्रस्य

ऋषभयोगीश्वर ऋषिः।

अनुष्टुप् छन्दः।

श्रीसाम्बसदाशिवो देवता।

asya śrī śivakavaca stotramahāmantrasya
ṛṣabhayogīśvara ṛṣiḥ |
anuṣṭup chandaḥ |
śrīsāmbasadāśivo devatā |

ओं बीजम्।

नमः शक्तिः।

शिवायेति कीलकम्।

मम साम्बसदाशिवप्रीत्यर्थे जपे विनियोगः।

oṁ bījam |
namaḥ śaktiḥ |
śivāyeti kīlakam |
mama sāmbasadāśivaprītyarthe jape viniyogaḥ |

2

करन्यासः

karanyāsaḥ

ओं सदाशिवाय अंगुष्ठाभ्यां नमः।

नं गंगाधराय तर्जनीभ्यां नमः।

मं मृत्युञ्जयाय मध्यमाभ्यां नमः।

शिं शूलपाणये अनामिकाभ्यां नमः।

वां पिनाकपाणये कनिष्ठिकाभ्यां नमः।

यं उमापतये करतलकरपृष्ठाभ्यां नमः।

oṁ sadāśivāya aṁguṣṭhābhyāṁ namaḥ |
naṁ gaṁgādharāya tarjanībhyāṁ namaḥ |
maṁ mṛtyuñjayāya madhyamābhyāṁ namaḥ |
śiṁ śūlapāṇaye anāmikābhyāṁ namaḥ |
vāṁ pinākapāṇaye kaniṣṭhikābhyāṁ namaḥ |
yaṁ umāpataye karatalakarapṛṣṭhābhyāṁ namaḥ |

हृदयादि अंगन्यासः

hṛdayādi aṁganyāsaḥ

ओं सदाशिवाय हृदयाय नमः।

नं गंगाधराय शिरसे स्वाहा।

मं मृत्युञ्जयाय शिखायै वषट्।

शिं शूलपाणये कवचाय हुं।

वां पिनाकपाणये नेत्रत्रयाय वौषट्।

यं उमापतये अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः॥

oṁ sadāśivāya hṛdayāya namaḥ |
naṁ gaṁgādharāya śirase svāhā |
maṁ mṛtyuñjayāya śikhāyai vaṣaṭ |
śiṁ śūlapāṇaye kavacāya huṁ |
vāṁ pinākapāṇaye netratrayāya vauṣaṭ |
yaṁ umāpataye astrāya phaṭ |
bhūrbhuvassuvaromiti digbandhaḥ ||

ध्यानम्

dhyānam

वज्रदंष्ट्रं त्रिनयनं कालकण्ठ मरिंदमम्।

सहस्रकरमत्युग्रं वन्दे शंभुं उमापतिम्॥

vajradaṁṣṭraṁ trinayanaṁ kālakaṇṭha marimdamam |
sahasrakaramatyugraṁ vande śaṁbhuṁ umāpatim ||

रुद्राक्षकङ्कणलसत्करदण्डयुग्मः

पालान्तरालसितभस्मधृतत्रिपुण्ड्रः।

पञ्चाक्षरं परिपठन् वरमन्त्रराजं

ध्यायन् सदा पशुपतिं शरणं व्रजेथाः॥

rudrākṣakaṅkaṇalasatkaradaṇḍayugmaḥ
pālāntarālasitabhasmadhṛtatripuṇḍraḥ ।
pañcākṣaraṁ paripaṭhan varamantrarājaṁ
dhyāyan sadā paśupatiṁ śaraṇaṁ vrajethāḥ ।।

अतः परं सर्वपुराणगुह्यं

निःशेषपापौघहरं पवित्रम्।

जयप्रदं सर्वविपत्प्रमोचनं

वक्ष्यामि शैवम् कवचं हिताय ते॥

ataḥ paraṁ sarvapurāṇaguhyaṁ
niḥśeṣapāpaughaharaṁ pavitram ।
jayapradaṁ sarvavipatpramocanaṁ
vakṣyāmi śaivam kavacaṁ hitāya te ।।

पञ्चपूजा

pañcapūjā

लं पृथिव्यात्मने गन्धं समर्पयामि।

हं आकाशात्मने पुष्पैः पूजयामि।

यं वाय्वात्मने धूपम् आघ्रापयामि।

रं अग्न्यात्मने दीपं दर्शयामि।

वं अमृतात्मने अमृतं महानैवेद्यं निवेदयामि।

सं सर्वात्मने सर्वोपचारपूजां समर्पयामि॥

laṁ pṛthivyātmane gandhaṁ samarpayāmi ।
haṁ ākāśātmane puṣpaiḥ pūjayāmi ।
yaṁ vāyvātmane dhūpam āghrāpayāmi ।
raṁ agnyātmane dīpaṁ darśayāmi ।
vaṁ amṛtātmane amṛtaṁ mahānaivedyaṁ nivedayāmi ।
saṁ sarvātmane sarvopacārapūjāṁ samarpayāmi ।।

मन्त्रः

mantraḥ

ऋषभ उवाच ---

नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम्।

वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥ १॥

ṛṣabha uvāca ---
namaskṛtya mahādevaṁ viśvavyāpinamīśvaram ।
vakṣye śivamayaṁ varma sarvarakṣākaraṁ nṛṇām ।। 1।।

शुचौ देशे समासीनो यथावत्कल्पितासनः।

जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम्॥ २॥

śucau deśe samāsīno yathāvatkalpitāsanaḥ ।
jitendriyo jitaprāṇaścintayecchivamavyayam ।। 2।।

हृत्पुण्डरीकान्तरसन्निविष्टं

स्वतेजसा व्याप्तनभोऽवकाशम्।

अतीन्द्रियं सूक्ष्ममनन्तमाद्यं

ध्यायेत् परानन्दमयं महेशम्॥

hṛtpuṇḍarīkāntarasanniviṣṭaṁ
svatejasā vyāptanabho'vakāśam ।
atīndriyaṁ sūkṣmamanantamādyaṁ
dhyāyet parānandamayaṁ maheśam ।।

ध्यानावधूताखिलकर्मबन्ध-

श्चिरं चिदानन्द निमग्नचेताः।

षडक्षरन्यास समाहितात्मा

शैवेन कुर्यात्कवचेन रक्षाम्॥

dhyānāvadhūtākhilakarmabandha-
ściraṁ cidānanda nimagnacetāḥ ।
ṣaḍakṣaranyāsa samāhitātmā
śaivena kuryātkavacena rakṣām ।।

मां पातु देवोऽखिलदेवतात्मा

संसारकूपे पतितं गभीरे।

तन्नाम दिव्यं परमन्त्रमूलं

  धुनोतु मे सर्वमघं हृदिस्थम्॥

mām pātu devo'khiladevatātmā
  saṁsārakūpe patitaṁ gabhīre ।
tannāma divyaṁ paramantramūlaṁ
  dhunotu me sarvamaghaṁ hṛdistham ।।

सर्वत्र मां रक्षतु विश्वमूर्ति-

  र्ज्योतिर्मयानन्दघनश्चिदात्मा।

अणोरणियानुरुशक्तिरेकः

  स ईश्वरः पातु भयादशेषात्॥

sarvatra māṁ rakṣatu viśvamūrti-
  rjyotirmayānandaghanaścidātmā ।
aṇoraṇiyānuruśaktirekaḥ
  sa īśvaraḥ pātu bhayādaśeṣāt ।।

यो भूस्वरूपेण बिभर्ति विश्वं

  पायात्स भूमेर्गिरिशोऽष्टमूर्तिः।

योऽपां स्वरूपेण नृणां करोति

  संजीवनं सोऽवतु मां जलेभ्यः॥

yo bhūsvarūpeṇa bibharti viśvaṁ
  pāyātsa bhūmergiriśo'ṣṭamūrtiḥ ।
yo'pāṁ svarūpeṇa nṛṇāṁ karoti
  saṁjīvanaṁ so'vatu māṁ jalebhyaḥ ।।

कल्पावसाने भुवनानि दग्ध्वा

  सर्वाणि यो नृत्यति भूरिलीलः।

स कालरुद्रोऽवतु मां दवाग्नेः

  वात्यादिभीतेरखिलाच्च तापात्॥

kalpāvasāne bhuvanāni dagdhvā
  sarvāṇi yo nṛtyati bhūrilīlaḥ ।
sa kālarudro'vatu māṁ davāgneḥ
  vātyādibhīterakhilācca tāpāt ।।

प्रदीप्तविद्युत्कनकावभासो

  विद्यावराभीति कुठारपाणिः।

चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः

  प्राच्यां स्थितो रक्षतु मामजस्रम्॥

pradīptavidyutkanakāvabhāso
  vidyāvarābhīti kuṭhārapāṇiḥ ।
caturmukhastatpuruṣastrinetraḥ
  prācyāṁ sthito rakṣatu māmajasram ।।

कुठारखेटाङ्कुश शूलढक्का-

  कपालपाशाक्ष गुणान्दधानः।

kuṭhārakheṭāṅkuśa śūlaḍhakkā-
  kapālapāśākṣa guṇāndadhānaḥ ।

कुन्देन्दुशङ्खस्फटिकावभासो

  वेदाक्षमाला वरदाभयाङ्कः।

त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः

  सद्योऽधिजातोऽवतु मां प्रतीच्याम्॥

kundenduśaṅkhasphaṭikāvabhāso
  vedākṣamālā varadābhayāṅkaḥ ।
tryakṣaścaturvaktra uruprabhāvaḥ
  sadyo'dhijāto'vatu māṁ pratīcyām ।।

वराक्षमालाभयटङ्कहस्तः

  सरोजकिञ्जल्कसमानवर्णः।

त्रिलोचनश्चारुचतुर्मुखो मां

  पायादुदीच्यां दिशि वामदेवः॥

varākṣamālābhayaṭaṅkahastaḥ
  sarojakiñjalkasamānavarṇaḥ ।
trilocanaścārucaturmukho māṁ
  pāyādudīcyāṁ diśi vāmadevaḥ ।।

वेदाभयेष्टाङ्कुशटङ्कपाश-

  कपालढक्काक्षरशूलपाणिः।

सितद्युतिः पञ्चमुखोऽवतान्मां

  ईशान ऊर्ध्वं परमप्रकाशः॥

vedābhayeṣṭāṅkuśaṭaṅkapāśa-
  kapālaḍhakkākṣaraśūlapāṇiḥ ।
sitadyutiḥ pañcamukho'vatānmāṁ

īśāna ūrdhvaṁ paramaprakāśaḥ ||

मूर्धानमव्यान्मम चन्द्रमौलिः

भालं ममाव्यादथ भालनेत्रः।

नेत्रे ममाव्याद्भगनेत्रहारी

नासां सदा रक्षतु विश्वनाथः॥

mūrdhānamavyānmama candramauliḥ
bhālaṁ mamāvyādatha bhālanetraḥ |
netre mamāvyādbhaganetrahārī
nāsāṁ sadā rakṣatu viśvanāthaḥ ||

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः

कपोलमव्यात्सततं कपाली।

वक्त्रं सदा रक्षतु पञ्चवक्त्रो

जिह्वां सदा रक्षतु वेदजिह्वः॥

pāyācchrutī me śrutigītakīrtiḥ
kapolamavyātsatataṁ kapālī |
vaktraṁ sadā rakṣatu pañcavaktro
jihvāṁ sadā rakṣatu vedajihvaḥ ||

कण्ठं गिरीशोऽवतु नीलकण्ठः

पाणिद्वयं पातु पिनाकपाणिः।

दोर्मूलमव्यान्मम धर्मबाहुः

वक्षःस्थलं दक्षमखान्तकोऽव्यात्॥

kaṇṭhaṁ girīśo'vatu nīlakaṇṭhaḥ
pāṇidvayaṁ pātu pinākapāṇiḥ |
dormūlamavyānmama dharmabāhuḥ
vakṣaḥsthalaṁ dakṣamakhāntako'vyāt ||

ममोदरं पातु गिरीन्द्रधन्वा

मध्यं ममाव्यान्मदनान्तकारी।

हेरम्बतातो मम पातु नाभिं

पायात्कटिं धूर्जटिरीश्वरो मे॥

mamodaraṁ pātu girīndradhanvā
madhyaṁ mamāvyānmadanāntakārī |
herambatāto mama pātu nābhiṁ
pāyātkaṭiṁ dhūrjaṭirīśvaro me ||

ऊरुद्वयं पातु कुबेरमित्रो

जानुद्वयं मे जगदीश्वरोऽव्यात्।

जङ्घायुगं पुङ्गवकेतुरव्यात्

पादौ ममाव्यात्सुरवन्द्यपादः॥

ūrudvayaṁ pātu kuberamitro
jānudvayaṁ me jagadīśvaro'vyāt |
jaṅghāyugaṁ puṅgavaketuravyāt
pādau mamāvyātsuravandyapādaḥ ||

महेश्वरः पातु दिनादियामे

मां मध्ययामेऽवतु वामदेवः।

त्रिलोचनः पातु तृतीययामे

वृषध्वजः पातु दिनान्त्ययामे॥

maheśvaraḥ pātu dinādiyāme
māṁ madhyayāme'vatu vāmadevaḥ |
trilocanaḥ pātu tṛtīyayāme
vṛṣadhvajaḥ pātu dināntyayāme ||

पायान्निशादौ शशिशेखरो मां

गङ्गाधरो रक्षतु मां निशीथे।

गौरीपतिः पातु निशावसाने

मृत्युञ्जयो रक्षतु सर्वकालम्॥

pāyānniśādau śaśiśekharo māṁ
gaṅgādharo rakṣatu māṁ niśīthe |
gaurīpatiḥ pātu niśāvasāne
mṛtyuñjayo rakṣatu sarvakālam ||

अन्तःस्थितं रक्षतु शंकरो मां

स्थाणुः सदा पातु बहिःस्थितं माम्।

तदन्तरे पातु पतिः पशूनां

सदाशिवो रक्षतु मां समन्तात्॥

antaḥsthitaṁ rakṣatu śaṁkaro māṁ
sthāṇuḥ sadā pātu bahiḥsthitaṁ mām |
tadantare pātu patiḥ paśūnāṁ
sadāśivo rakṣatu māṁ samantāt ||

तिष्ठन्तमव्याद् भुवनैकनाथः

पायाद्व्रजन्तं प्रमथाधिनाथः।

वेदान्तवेद्योऽवतु मां निषण्णं

मामव्ययः पातु शिवः शयानम्॥

tiṣṭhantamavyād bhuvanaikanāthaḥ
pāyādvrajantaṁ pramathādhināthaḥ ।
vedāntavedyo'vatu māṁ niṣaṇṇaṁ
māmavyayḥ pātu śivaḥ śayānam ।।

मार्गेषु मां रक्षतु नीलकण्ठः

शैलादिदुर्गेषु पुरत्रयारिः।

अरण्यवासादि महाप्रवासे

पायान्मृगव्याध उदारशक्तिः॥

mārgeṣu māṁ rakṣatu nīlakaṇṭhaḥ
śailādidurgeṣu puratrayāriḥ ।
araṇyavāsādi mahāpravāse
pāyānmṛgavyādha udāraśaktiḥ ।।

कल्पान्तकालोग्रपटुप्रकोप-

स्फुटाट्टहासोच्चलिताण्डकोशः।

घोरारिसेनार्णव दुर्निवार-

महाभयाद्रक्षतु वीरभद्रः॥

kalpāntakālograpaṭuprakopa-
sphuṭāṭṭahāsoccalitāṇḍakośaḥ ।
ghorārisenārṇava durnivāra-
mahābhayādrakṣatu vīrabhadraḥ ।।

पत्त्यश्वमातङ्गरथावरूथिनी-

pattyaśvamātaṅgarathāvarūthinī-

निहन्तु दस्यून्प्रलयानलार्चिः

ज्वलत्त्रिशूलं त्रिपुरान्तकस्य।

शार्दूलसिंहर्क्षवृकादिहिंस्रान्

संत्रासयत्वीशधनुः पिनाकः॥

nihantu dasyūnpralayānalārciḥ
jvalattriśūlaṁ tripurāntakasya ।
śārdūlasiṁharkṣavṛkādihiṁsrān
saṁtrāsayatvīśadhanuḥ pinākaḥ ।।

दुः स्वप्न दुः शकुन दुर्गति दौर्मनस्य-

दुर्भिक्ष दुर्व्यसन दुःसह दुर्यशांसि।

उत्पाततापविषभीतिमसद्ग्रहार्तिं

व्याधींश्च नाशयतु मे जगतामधीशः॥

duḥ svapna duḥ śakuna durgati daurmanasya-
durbhikṣa durvyasana duḥsaha duryaśāṁsi ।
utpātatāpaviṣabhītimasadgrahārtiṁ
vyādhīṁśca nāśayatu me jagatāmadhīśaḥ ।।

4

ॐ नमो भगवते सदाशिवाय

सकलतत्वात्मकाय

सर्वमन्त्रस्वरूपाय

सर्वयन्त्राधिष्ठिताय

सर्वतन्त्रस्वरूपाय

सर्वतत्वविदूराय

ब्रह्मरुद्रावतारिणे

नीलकण्ठाय

पार्वतीमनोहरप्रियाय

सोमसूर्याग्निलोचनाय

भस्मोद्धूलितविग्रहाय

महामणि मुकुटधारणाय

माणिक्यभूषणाय

सृष्टिस्थितिप्रलयकाल-

रौद्रावताराय

दक्षाध्वरध्वंसकाय

महाकालभेदनाय

मूलधारैकनिलयाय

तत्वातीताय

गंगाधराय

om namo bhagavate sadāśivāya
sakalatatvātmakāya
sarvamantrasvarūpāya
sarvayantrādhiṣṭhitāya
sarvatantrasvarūpāya
sarvatatvavidūrāya
brahmarudrāvatāriṇe
nīlakaṇṭhāya
pārvatīmanoharapriyāya
somasūryāgnilocanāya
bhasmoddhūlitavigrahāya
mahāmaṇi mukuṭadhāraṇāya
māṇikyabhūṣaṇāya
sṛṣṭisthitipralayakāla-
raudrāvatārāya
dakṣādhvaradhvaṁsakāya
mahākālabhedanāya
mūladhāraikanilayāya
tatvātītāya
gaṁgādharāya

सर्वदेवादिदेवाय

षडाश्रयाय

वेदान्तसाराय

त्रिवर्गसाधनाय

अनन्तकोटिब्रह्माण्डनायकाय

अनन्त वासुकि तक्षक-

कर्कोटक शङ्ख कुलिक-

पद्म महापद्मेति-

अष्टमहानागकुलभूषणाय

प्रणवस्वरूपाय

चिदाकाशाय

आकाश दिक् स्वरूपाय

ग्रहनक्षत्रमालिने

सकलाय

कलङ्करहिताय

सकललोकैककर्त्रे

सकललोकैकभर्त्रे

सकललोकैकसंहर्त्रे

सकललोकैकगुरवे

सकललोकैकसाक्षिणे

sarvadevādidevāya
ṣaḍāśrayāya
vedāntasārāya
trivargasādhanāya
anantakoṭibrahmāṇḍanāyakāya
ananta vāsuki takṣaka-
karkoṭaka śaṅkha kulika-
padma mahāpadmeti-
aṣṭamahānāgakulabhūṣaṇāya
praṇavasvarūpāya
cidākāśāya
ākāśa dik svarūpāya
grahanakṣatramāline
sakalāya
kalaṅkarahitāya
sakalalokaikakartre
sakalalokaikabhartre
sakalalokaikasaṁhartre
sakalalokaikagurave
sakalalokaikasākṣiṇe

सकलनिगमगुह्याय

सकलवेदान्तपारगाय

सकललोकैकवरप्रदाय

सकललोकैकशंकराय

सकलदुरितार्तिभञ्जनाय

सकलजगदभयंकराय

शशाङ्कशेखराय

शाश्वतनिजावासाय

निराकाराय

निराभासाय

निरामयाय

निर्मलाय

निर्मदाय

निश्चिन्ताय

निरहंकाराय

निरंकुशाय

निष्कलङ्काय

निर्गुणाय

निष्कामाय

निरूपप्लवाय

sakalanigamaguhyāya
sakalavedāntapāragāya
sakalalokaikavarapradāya
sakalalokaikaśaṁkarāya
sakaladuritārtibhañjanāya
sakalajagadabhayaṁkarāya
śaśāṅkaśekharāya
śāśvatanijāvāsāya
nirākārāya
nirābhāsāya
nirāmayāya
nirmalāya
nirmadāya
niścintāya
nirahaṁkārāya
niraṁkuśāya
niṣkalaṅkāya
nirguṇāya
niṣkāmāya
nirūpaplavāya

निरुपद्रवाय

निरवद्याय

निरन्तराय

निष्कारणाय

निरातंकाय

निष्प्रपञ्चाय

निस्सङ्गाय

निर्द्वन्द्वाय

निराधाराय

नीरागाय

निष्क्रोधाय

निर्लोपाय

निष्पापाय

निर्भयाय

निर्विकल्पाय

निर्भेदाय

निष्क्रियाय

निस्तुलाय

निःसंशयाय

निरंजनाय

nirupadravāya
niravadyāya
nirantarāya
niṣkāraṇāya
nirātaṁkāya
niṣprapañcāya
nissaṅgāya
nirdvandvāya
nirādhārāya
nīrāgāya
niṣkrodhāya
nirlopāya
niṣpāpāya
nirbhayāya
nirvikalpāya
nirbhedāya
niṣkriyāya
nistulāya
niḥsaṁśayāya
niraṁjanāya

निरुपमविभवाय

नित्यशुद्धबुद्धमुक्तपरिपूर्ण-

सच्चिदानन्दाद्वयाय

परमशान्तस्वरूपाय

परमशान्तप्रकाशाय

तेजोरूपाय

तेजोमयाय

तेजोऽधिपतये

nirupamavibhavāya
nityaśuddhabuddhamuktaparipūrṇa-
saccidānandādvayāya
paramaśāntasvarūpāya
paramaśāntaprakāśāya
tejorūpāya
tejomayāya
tejo'dhipataye

3

जय जय रुद्र

महारुद्र

महारौद्र

भद्रावतार

महाभैरव

कालभैरव

कल्पान्तभैरव

कपालमालाधर

खट्वाङ्ग चर्मखङ्गधर पाशाङ्कुश-

डमरूशूल चापबाणगदाशक्तिभिंदिपाल-

तोमर मुसल मुद्गर पाश परिघ-

भुशुण्डी शतघ्नी चक्राद्यायुधभीषणाकार-

सहस्रमुखदंष्ट्राकरालवदन

विकटाट्टहास विस्फारित ब्रह्माण्डमण्डल

नागेन्द्रकुण्डल

नागेन्द्रहार

नागेन्द्रवलय

नागेन्द्रचर्मधर

नागेन्द्रनिकेतन

मृत्युञ्जय

jaya jaya rudra
mahārudra
mahāraudra
bhadrāvatāra
mahābhairava
kālabhairava
kalpāntabhairava
kapālamālādhara
khaṭvāṅga carmakhaḍgadhara pāśāṅkuśa-
ḍamarūśūla cāpabāṇagadāśaktibhiṁdipāla-
tomara musala mudgara pāśa parigha-
bhuśuṇḍī śataghnī
cakrādyāyudhabhīṣaṇākāra-
sahasramukhadaṁṣṭrākarālavadana
vikaṭāṭṭahāsa visphārita
brahmāṇḍamaṇḍala
nāgendrakuṇḍala
nāgendrahāra
nāgendravalaya
nāgendracarmadhara
nāgendraniketana
mṛtyuñjaya

त्र्यम्बक

त्रिपुरान्तक

विश्वरूप

विरूपाक्ष

विश्वेश्वर

वृषभवाहन

विषविभूषण

विश्वतोमुख

सर्वतोमुख

मां रक्ष रक्ष

ज्वलज्वल

प्रज्वल प्रज्वल

महामृत्युभयं शमय शमय

अपमृत्युभयं नाशय नाशय

रोगभयं उत्सादयोत्सादय

विषसर्पभयं शमय शमय

चोरान् मारय मारय

मम शत्रून् उच्चाटयोच्चाटय

त्रिशूलेन विदारय विदारय

कुठारेण भिन्धि भिन्धि

tryambaka
tripurāntaka
viśvarūpa
virūpākṣa
viśveśvara
vṛṣabhavāhana
viṣavibhūṣaṇa
viśvatomukha
sarvatomukha
māṁ rakṣa rakṣa
jvalajvala
prajvala prajvala
mahāmṛtyubhayaṁ śamaya śamaya
apamṛtyubhayaṁ nāśaya nāśaya
rogabhayaṁ utsādayotsādaya
viṣasarpabhayaṁ śamaya śamaya
corān māraya māraya
mama śatrūn uccāṭayoccāṭaya
triśūlena vidāraya vidāraya
kuṭhāreṇa bhindhi bhindhi

खड्गेन छिन्दि् छिन्दि्

khaḍgena chinddi chinddi

हर हर मृत्युंजय त्र्यम्बक सदाशिव परमशिव नमस्ते नमस्ते नमः॥

hara hara mṛtyuṁjaya tryambaka sadāśiva paramaśiva namaste namaste namaḥ || 2

फल श्रुतिः

phala śrutiḥ

ऋषभ उवाच ---

इत्येतत्परमं शैवं कवचं व्याहृतं मया।

सर्व बाधा प्रशमनं रहस्यं सर्व देहिनाम्॥

ṛṣabha uvāca ---
ityetatparamaṁ śaivaṁ kavacaṁ vyāhṛtaṁ mayā |
sarva bādhā praśamanaṁ rahasyaṁ sarva dehinām ||

यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम्।

न तस्य जायते कापि भयं शंभोरनुग्रहात्॥

yaḥ sadā dhārayenmartyaḥ śaivaṁ kavacamuttamam |
na tasya jāyate kāpi bhayaṁ śaṁbhoranugrahāt ||

क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा।

सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति॥

kṣīṇāyuḥ prāptamṛtyurvā mahārogahato'pi vā |
sadyaḥ sukhamavāpnoti dīrghamāyuśca vindati ||

सर्वदारिद्रयशमनं सौमाङ्गल्यविवर्धनम्।

यो धत्ते कवचं शैवं स देवैरपि पूज्यते॥

sarvadāridrayaśamanaṁ saumāṅgalyavivardhanam |
yo dhatte kavacaṁ śaivaṁ sa devairapi pūjyate ||

महापातकसङ्घातैर्मुच्यते चोपपातकैः।

देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः॥

mahāpātakasaṅghātairmucyate copapātakaiḥ |
dehānte muktimāpnoti śivavarmānubhāvataḥ ||

त्वमपि श्रद्दया वत्स शैवं कवचमुत्तमम्।

धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि॥

tvamapi śraddayā vatsa śaivaṁ kavacamuttamam |
dhārayasva mayā dattaṁ sadyaḥ śreyo

hyavāpsyasi | |

श्रीसूत उवाच ---

इत्युक्त्वा ऋषभो योगी तस्मै पार्थिव सूनवे।

ददौ शङ्खं महारावं खड्गं च अरिनिषूदनम्॥

śrīsūta uvāca ---
ityuktvā ṛṣabho yogī tasmai pārthiva sūnave |
dadau śaṅkhaṁ mahārāvaṁ khaḍgaṁ ca ariniṣūdanam | |

पुनश्च भस्म संमंत्र्य तदङ्गं परितोऽस्पृशत्।

गजानां षट्सहस्रस्य त्रिगुणस्य बलं ददौ॥

punaśca bhasma saṁmaṁtrya tadaṅgaṁ parito'spṛśat |
gajānāṁ ṣaṭsahasrasya triguṇasya balaṁ dadau | |

भस्मप्रभावात् संप्राप्तबलैश्वर्य धृति स्मृतिः।

स राजपुत्रः शुशुभे शरदर्क इव श्रिया॥

bhasmaprabhāvāt saṁprāptabalaiśvarya dhṛti smṛtiḥ |
sa rājaputraḥ śuśubhe śaradarka iva śriyā | |

तमाह प्राञ्जलिं भूयः स योगी नृपनन्दनम्।

एष खड्गो मया दत्तस्तपोमन्त्रानुभावतः॥

tamāha prāñjaliṁ bhūyaḥ sa yogī nṛpanandanam |
eṣa khaḍgo mayā dattastapomantrānubhāvataḥ | |

शितधारमिमं खड्गं यस्मै दर्शयसे स्फुटम्।

स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम्॥

śitadhāramimaṁ khaḍgaṁ yasmai darśayase sphuṭam |
sa sadyo mriyate śatruḥ sākṣānmṛtyurapi svayam | |

अस्य शङ्खस्य निर्ह्रादं ये शृण्वन्ति तवाहिताः।

ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः॥

asya śaṅkhasya nirhrādaṁ ye śṛṇvanti tavāhitāḥ |
te mūrcchitāḥ patiṣyanti nyastaśastrā vicetanāḥ | |

खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशकौ।

आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ॥

khaḍgaśaṅkhāvimau divyau parasainyavināśakau |
ātmasainyasvapakṣāṇāṁ śauryatejovivardhanau | |

एतयोश्च प्रभावेन शैवेन कवचेन च।

द्विषट्सहस्र नागानां बलेन महतापि च॥

etayośca prabhāvena śaivena kavacena ca |
dviṣaṭsahasra nāgānāṁ balena mahatāpi ca | |

भस्मधारण सामर्थ्याच्छत्रुसैन्यं विजेष्यसे।

प्राप्य सिंहासनं पित्र्यं गोप्ताऽसि पृथिवीमिमाम्॥

bhasmadhāraṇa sāmarthyācchatrusainyaṁ vijeṣyase |
prāpya siṁhāsanaṁ pitryaṁ goptā'si pṛthivīmimām | |

इति भद्रायुषं सम्यगनुशास्य समातृकम्।

ताभ्यां संपूजितः सोऽथ योगी स्वैरगतिर्ययौ॥

iti bhadrāyuṣaṁ samyaganuśāsya samātṛkam |
tābhyāṁ saṁpūjitaḥ so'tha yogī svairagatiryayau | |

॥ ॥ इति श्रीस्कन्दमहापुराणे ब्रह्मोत्तरखण्डे शिवकवच प्रभाव

वर्णनं नाम द्वादशोऽध्यायः संपूर्णः॥

| | | | iti śrīskandamahāpurāṇe brahmottarakhaṇḍe śivakavaca prabhāva varṇanaṁ nāma dvādaśo'dhyāyaḥ saṁpūrṇaḥ | |

# ॥ श्री शिव पूजा ॥

# | | śrī śiva pūjā | |

_______________ नाम संवत्सरे

_______________अयणे _______________ ऋतौ

_______________ मासे

_______________ पक्षे _______________ तिथौ

_______________ नक्षत्रे _______________ वासरे

_______________ nāma saṁvatsare
_______________ayaṇe _______________ ṛtau
_______________ māse
_______________ pakṣe _______________
tithau _______________ nakṣatre
_______________ vāsare

1 At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः।

ॐ सर्वेभ्यो देवेभ्यो नमः।

ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥

प्रारंभ कार्यं निर्विघ्नमस्तु। शुभं शोभनमस्तु।

इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु॥

om sarvebhyo gurubhyo namaḥ |
om sarvebhyo devebhyo namaḥ |
om sarvebhyo brāhmaṇebhyo namaḥ | |
prāraṁbha kāryaṁ nirvighnamastu |
śubhaṁ śobhanamastu |
iṣṭa devatā kuladevatā suprasannā varadā bhavatu | |

अनुज्ञां देहि॥

anujñāṁ dehi | |

at the shiva Altar

२ आचमनः

2 ācamanaḥ
(Sip one spoon of water after each mantra)

ॐ केशवाय स्वाहा। ॐ नारायणाय स्वाहा।

ॐ माधवाय स्वाहा।

om keśavāya svāhā | om nārāyaṇāya svāhā |
om mādhavāya svāhā |

(Now we chant the 21 names of the Lord, in order to concentrate on the Lord)

ॐ गोविंदाय नमः। ॐ विष्णवे नमः।

ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः।

ॐ वामनाय नमः। ॐ श्रीधराय नमः।

ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः।

ॐ दामोदराय नमः। ॐ सङ्कर्षणाय नमः।

ॐ वासुदेवाय नमः। ॐ प्रद्युम्नाय नमः।

ॐ अनिरुद्धाय नमः। ॐ पुरुषोत्तमाय नमः।

ॐ अधोक्षजाय नमः। ॐ नारसिंहाय नमः।

ॐ अच्युताय नमः। ॐ जनार्दनाय नमः।

ॐ उपेंद्राय नमः। ॐ हरये नमः।

श्री कृष्णाय नमः॥

प्राणायामः

om goviṁdāya namaḥ | om viṣṇave namaḥ |
om madhusūdanāya namaḥ | om trivikramāya namaḥ |
om vāmanāya namaḥ | om śrīdharāya namaḥ |
om hṛṣīkeśāya namaḥ | om padmanābhāya namaḥ |

om dāmodarāya namaḥ । om saṅkarṣaṇāya namaḥ ।
om vāsudevāya namaḥ । om pradyumnāya namaḥ ।
om aniruddhāya namaḥ । om puruṣottamāya namaḥ ।
om adhokṣajāya namaḥ । om nārasiṁhāya namaḥ ।
om acyutāya namaḥ । om janārdanāya namaḥ ।
om upeṁdrāya namaḥ । om haraye namaḥ ।
śrī kṛṣṇāya namaḥ ।।
prāṇāyāmaḥ

ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता।

दैवी गायत्री छन्दः। प्राणायामे विनियोगः॥

om praṇavasya parabrahma ṛṣiḥ । paramātmā devatā ।
daivī gāyatrī chandaḥ । prāṇāyāme viniyogaḥ ।।

ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः।

ॐ जनः। ॐ तपः। ॐ सत्यम्।

ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही

धियो यो नः प्रचोदयात्॥

om bhūḥ । om bhuvaḥ । om svaḥ । om mahaḥ ।
om janaḥ । om tapaḥ । om satyam ।
om tatsaviturvareṇyaṁ bhargodevasya dhīmahī
dhiyo yo naḥ pracodayāt ।।

पुनराचमन

punarācamana
(Repeat Achamana 2 - given above)

ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम्॥

om āpojyoti rasomṛtaṁ brahma bhūrbhuvassuvarom ।।
(Apply water to eyes and understand that you are of
the nature of Brahman)

सङ्कल्पः

saṅkalpaḥ

ॐ श्रीमान् महागणाधिपतये नमः।

om śrīmān mahāgaṇādhipataye namaḥ ।

श्री गुरुभ्यो नमः। श्री सरस्वत्यै नमः।

श्री वेदाय नमः। श्री वेदपुरुषाय नमः।

इष्टदेवताभ्यो नमः।

śrī gurubhyo namaḥ । śrī sarasvatyai namaḥ ।
śrī vedāya namaḥ । śrī vedapuruṣāya namaḥ ।
iṣṭadevatābhyo namaḥ ।
(Prostrations to your favorite deity)

कुलदेवताभ्यो नमः।

kuladevatābhyo namaḥ ।
(Prostrations to your family deity)

स्थानदेवताभ्यो नमः।

sthānadevatābhyo namaḥ ।
(Prostrations to the deity of this house)

ग्रामदेवताभ्यो नमः।

grāmadevatābhyo namaḥ ।
(Prostrations to the deity of this place)

वास्तुदेवताभ्यो नमः।

vāstudevatābhyo namaḥ ।
(Prostrations to the deity of all the materials we have collected)

शचीपुरंदराभ्यां नमः।

śacīpuraṁdarābhyāṁ namaḥ ।
(Prostrations to the Indra and shachii)

उमामहेश्वराभ्यां नमः।

umāmaheśvarābhyāṁ namaḥ ।
(Prostrations to Shiva and pArvati)

मातापितृभ्यां नमः।

mātāpitṛbhyāṁ namaḥ ।
(Prostrations to our parents)

लक्ष्मीनारायणाभ्यां नमः।

lakṣmīnārāyaṇābhyāṁ namaḥ ।
(Prostrations to the Lords who protect us -

LakShmi and NArAyaNa)

सर्वेभ्यो देवेभ्यो नमो नमः।

sarvebhyo devebhyo namo namaḥ |
(Prostrations to all the Gods)

सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः।

sarvebhyo brāhmaṇebhyo namo namaḥ |
(Prostrations to all Brahamanas - those who are in the religious path)

येतद्कर्मप्रधान देवताभ्यो नमो नमः।

yetadkarmapradhāna devatābhyo namo namaḥ |
(Prostrations to Lord Shiva, the main deity if this puja)

॥ अविघ्नमस्तु॥

|| avighnamastu ||

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः।

लंबोदरश्च विकटो विघ्ननाशो गणाधिपः॥

धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः।

द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि॥

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा।

संग्रामे सङ्कटेश्चैव विघ्नः तस्य न जायते॥

sumukhaśca ekadaṁtaśca kapilo gajakarṇakaḥ |
laṁbodaraśca vikaṭo vighnanāśo gaṇādhipaḥ ||
dhūmraketurgaṇādhyakṣo bālacandro gajānanaḥ |
dvādaśaitāni nāmāni yaḥ paṭhet śruṇuyādapi ||
vidyāraṁbhe vivāhe ca praveśe nirgame tathā |
saṁgrāme saṅkaṭeścaiva vighnaḥ tasya na jāyate ||

(Whoever chants or hears these 12 names of Lord
Ganesha will not have any obstacles in all their endeavours)

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥

śuklāṁbaradharaṁ devaṁ śaśivarṇaṁ caturbhujam |
prasannavadanaṁ dhyāyet sarva vighnopaśāṁtaye ||

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके।

शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते॥

sarvamaṅgala māṅgalye śive sarvārtha sādhike |
śaraṇye tryaṁbake devī nārāyaṇī namo'stute ||

(We completely surrender ourselves to that Goddess
who embodies auspiciousness, who is full of auspiciousness and who brings auspicousness to us)

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम्।

येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः॥

sarvadā sarva kāryeṣu nāsti teṣāṁ amaṅgalam |
yeṣāṁ hṛdistho bhagavān maṅgalāyatano hariḥ ||

When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no more inauspiciousness in any of our undertakings)
(When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no more inauspiciousness in any of our undertakings)

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव।

विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि॥

tadeva lagnaṁ sudinaṁ tadeva tārābalaṁ caṁdrabalaṁ tadeva |
vidyā balaṁ daivabalaṁ tadeva lakṣmīpateḥ teṁghri'yugaṁ smarāmi ||

(What is the best time to worship the Lord? When our

hearts are at the feet of Lord Narayana, then the strength of the stars, the moon, the strength of knowledge and all the Gods will combine and make it
the most auspicious time and day to worship the Lord)

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।

येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः॥

lābhasteṣāṁ jayasteṣāṁ kutasteṣāṁ parājayaḥ ।
yeṣāṁ indīvara śyāmo hṛdayastho janārdanaḥ ।।

(When the Lord is situated in a person's heart, he will always have profit in his work and victory in all
that he takes up and there is no question of defeat
for such a person)

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान्।

सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये॥

vināyakaṁ guruṁ bhānuṁ brahmāviṣṇumaheśvarān ।
sarasvatīṁ praṇamyādau sarva kāryārtha siddhaye ।।

(To achieve success in our work and to find fulfillment we should first offer our prayers
to Lord Vinayaka and then to our teacher, then to the Sun God and to the holy trinity of Brahma,
ViShNu and Shiva)

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य

अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे

वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे

दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे

तीरे परशुराम क्षत्रे सम्युक्त अमेरिका देशे St Lewis ग्रामे

or Australia देशे Victoria ग्रामे बह्रीनु देशे

शालिवाहन शके वर्तमाने व्यवहारिके बहु धान्य नाम संवत्सरे

उत्तरायणे शिशिर ऋतौ माघ मासे कृश्ण पक्षे त्रयोदसि तिथौ

उत्तराशाड नक्षत्रे रवि वासरे सर्व ग्रहेषु यथा राशि स्थान

स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम

आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं मम सकुटुम्बस्य क्षेम

स्थैर्य

आयुरारोग्य चतुर्विध पुरुषार्त्थ सिध्यर्थं अंगीकृत श्री शिवरात्रि

व्रतांगत्वेन संपादित सामग्रय्य श्रीगणेश वरुण इंद्रादि

अष्टलोकपाल गणपति चतुष्ट देवता पूजनपूर्वकं श्री शिव

प्रीत्यर्थं यथा शक्त्या यथा मिलितोपचार द्रव्यैः पुरुषसूक्त

पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारे श्री शिव

पूजनं करिष्ये॥

śrīmad bhagavato mahāpuruṣasya viṣṇorājñāya pravartamānasya
adya brahmaṇo'dvitīya parārdhe viṣṇupade śrī śvetavarāha kalpe
vaivasvata manvantare bhārata varṣe bharata khaṁḍe jaṁbūdvīpe
daṇḍakāraṇya deśe godāvaryā dakṣiṇe tīre kṛṣṇaveṇyo uttare
tīre paraśurāma kṣatre (samyukta amerikā deśe St Lewis grāme
or Australia deśe Victoria grāme bahrīnu deśe)
śālivāhana śake vartamāne vyavahārike bahu dhānya nāma saṁvatsare
uttarāyaṇe śiśira ṛtau māgha māse kṛśṇa pakṣe trayodasi tithau
uttarāśāḍa nakṣatre ravi vāsare sarva graheṣu yathā rāśi sthāna
sthiteṣu satsu yevaṁ guṇaviśeṣeṇa viśiṣṭāyāṁ śubhapuṇyatithau mama
ātmana śrutismṛtipurāṇokta phalaprāpyarthaṁ mama sakuṭumbasya kṣema sthairya
āyurārogya caturvidha puruṣārttha sidhyarthaṁ aṁgīkṛta śrī śivarātri
vratāṁgatvena saṁpādita sāmagrayya śrīgaṇeśa varuṇa iṁdrādi
aṣṭalokapāla gaṇapati catuṣṭa devatā pūjanapūrvakaṁ śrī śiva

prītyartham yathā śaktyā yathā
militopacāra dravyaiḥ puruṣasūkta
purāṇokta mantraiśca dhyānāvāhanādi
ṣoḍaśopacāre śrī śiva
pūjanaṁ kariṣye ||

इदं फलं मयादेव स्थापितं पुरतस्तव।

शिव पञ्चाक्षरी न्यास

(touching various parts of the body)
śiva pañcākṣarī nyāsa
(touching various parts of the body)

॥ ॐ॥

अस्य श्री शिव पञ्चाक्षरी मन्त्रस्य वामदेव ऋषिः।

अनुष्टुप् छन्दः। श्री सदाशिवो देवता।

श्री सदाशिव प्रीत्यर्थे न्यासे पूजने च विनियोगः॥

.. OM ..
asya shrii shiva paJNchaaxarii mantrasya
vaamadeva R^ishhiH .
anushhTup chhandaH . shrii sadaashivo devataa
.
shrii sadaashiva priityarthe nyaase puujane cha
viniyogaH ..

वामदेव ऋषये नमः। शिरसे स्वाहा॥

vāmadeva ṛṣaye namaḥ | śirase svāhā ||
(touch the head)

अनुष्टुप् छन्दसे नमः। मुखे स्वाहा॥

anuṣṭup chandase namaḥ | mukhe svāhā
||
(touch face)

श्री सदाशिव देवतायै नमः। ललाटे स्वाहा॥

śrī sadāśiva devatāyai namaḥ | lalāṭe svāhā
||
(touch the forehead)

ॐ नं तत्पुरुषाय नमः। हृदये स्वाहा॥

om naṁ tatpuruṣāya namaḥ | hṛdaye svāhā
||
( touch the heart)

ॐ मं अघोराय नमः। पादयो स्वाहा॥

तेन मे सफलावाप्तिर् भवेत् जन्मनि जन्मनि॥

idaṁ phalaṁ mayādeva sthāpitaṁ
puratastava |
tena me saphalāvāptir bhavet janmani
janmani ||
(keep fruits in front of the Lord)

om maṁ aghorāya namaḥ | pādayo svāhā
||
(touch feet)

ॐ शिं सद्योजाताय नमः। गुह्ये स्वाहा॥

om śiṁ sadyojātāya namaḥ | guhye svāhā
||
(touch groin)

ॐ वं वामदेवाय नमः। मूर्ध्नि स्वाहा॥

om vaṁ vāmadevāya namaḥ | mūrdhni
svāhā ||
(touch top of the skull )

ॐ यं ईशानाय नमः। श्रोत्रे स्वाहा॥

om yaṁ īśānāya namaḥ | śrotre svāhā ||
(touch ears)

ॐ ॐ हृदयाय नमः।

ॐ नं शिरसे स्वाहा।

ॐ मं शिखायै वौषट्।

ॐ शिं कवचाय हुं।

ॐ वं नेत्रत्रयाय वौषट्।

ॐ यं अस्त्राय फट्।

om om hṛdayāya namaḥ |
om naṁ śirase svāhā |
om maṁ śikhāyai vauṣaṭ |
om śiṁ kavacāya huṁ |
om vaṁ netratrayāya vauṣaṭ |
om yaṁ astrāya phaṭ |

दिग्बन्धन

digbandhana
( show mudras)

ॐ अघोरष्ट्रेन इति दिग्बन्धः। दिशो बद्नामि॥

om aghorasṭrena iti digbandhaḥ । diśo badnāmi ।।

गणपति पूजा

gaṇapati pūjā

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये।

ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगति

गणपत्यावाहने विनियोगः॥

ādau nirvighnatāsidhyarthaṁ mahā gaṇapatiṁ pūjanaṁ kariṣye ।
om gaṇānāṁ tvā śaunako gṛtsamado gaṇapatirjagati
gaṇapatyāvāhane viniyogaḥ ।।
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे।

कविं कविनामुपम श्रवस्तमम्।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत।

आनः श्रृण्वन्नूतिभिः सीदसादनम्॥

om gaṇānāṁ tvā gaṇapatiṁ āvāmahe ।
kaviṁ kavināmupama śravastamam ।
jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ।
ānaḥ śṛṇvannūtibhiḥ sīdasādanam ।।

भूः गणपतिं आवाहयामि।

भुवः गणपतिं आवाहयामि।

स्वः गणपतिं आवाहयामि।

ॐ भूर्भुवस्वः महागणपतये नमः।

ध्यायामि। ध्यानं समर्पयामि।

bhūḥ gaṇapatiṁ āvāhayāmi ।
bhuvaḥ gaṇapatiṁ āvāhayāmi ।
svaḥ gaṇapatiṁ āvāhayāmi ।
om bhūrbhuvasvaḥ mahāgaṇapataye namaḥ ।
dhyāyāmi । dhyānaṁ samarpayāmi ।

ॐ महागणपतये नमः। आवाहनं समर्पयामि।

ॐ महागणपतये नमः। आसनं समर्पयामि।

ॐ महागणपतये नमः। पाद्यं समर्पयामि।

ॐ महागणपतये नमः। अर्घ्यं समर्पयामि।

ॐ महागणपतये नमः। आचमनीयं समर्पयामि।

ॐ महागणपतये नमः। स्नानं समर्पयामि।

ॐ महागणपतये नमः। वस्त्रं समर्पयामि।

ॐ महागणपतये नमः। यज्ञोपवीतं समर्पयामि।

ॐ महागणपतये नमः। चंदनं समर्पयामि।

ॐ महागणपतये नमः। परिमल द्रव्यं समर्पयामि।

ॐ महागणपतये नमः। पुष्पाणि समर्पयामि।

ॐ महागणपतये नमः। धूपं समर्पयामि।

ॐ महागणपतये नमः। दीपं समर्पयामि।

ॐ महागणपतये नमः। नैवेद्यं समर्पयामि।

ॐ महागणपतये नमः। ताम्बूलं समर्पयामि।

ॐ महागणपतये नमः। फलं समर्पयामि।

ॐ महागणपतये नमः। दक्षिणां समर्पयामि।

ॐ महागणपतये नमः। आर्तिक्यं समर्पयामि।

om mahāgaṇapataye namaḥ । āvāhanaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । āsanaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । pādyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । arghyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । ācamanīyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । snānaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । vastraṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । yajñopavītaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । caṁdanaṁ samarpayāmi ।

om mahāgaṇapataye namaḥ । parimala dravyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । puṣpāṇi samarpayāmi ।
om mahāgaṇapataye namaḥ । dhūpaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । dīpaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । naivedyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । tāmbūlaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । phalaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । dakṣiṇāṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । ārtikyaṁ samarpayāmi ।

ॐ भूर्भुवस्वः महागणपतये नमः।

मन्त्रपुष्पं समर्पयामि।

ॐ भूर्भुवस्वः महागणपतये नमः।

प्रदक्षिणा नमस्कारान् समर्पयामि।

ॐ भूर्भुवस्वः महागणपतये नमः।

छत्रं समर्पयामि।

om bhūrbhuvasvaḥ mahāgaṇapataye namaḥ ।
mantrapuṣpaṁ samarpayāmi ।
om bhūrbhuvasvaḥ mahāgaṇapataye namaḥ ।
pradakṣiṇā namaskārān samarpayāmi ।
om bhūrbhuvasvaḥ mahāgaṇapataye namaḥ ।
chatraṁ samarpayāmi ।

ॐ महागणपतये नमः। चामरं समर्पयामि।

ॐ महागणपतये नमः। गीतं समर्पयामि।

ॐ महागणपतये नमः। नृत्यं समर्पयामि।

ॐ महागणपतये नमः। वाद्यं समर्पयामि।

ॐ महागणपतये नमः। सर्व राजोपचारान् समर्पयामि॥

om mahāgaṇapataye namaḥ । cāmaraṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । gītaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । nṛtyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । vādyaṁ samarpayāmi ।
om mahāgaṇapataye namaḥ । sarva rājopacārān samarpayāmi ।।

॥ अथ प्रार्थना॥

ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा।

निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा॥

ॐ भूर्भुवस्वः महागणपतये नमः। प्रार्थनां समर्पयामि।

।। atha prārthanā ।।
om vakratuṇḍa mahākāya koṭi sūrya samaprabhā ।
nirvighnaṁ kuru me deva sarva kāryeṣu sarvadā ।।
om bhūrbhuvasvaḥ mahāgaṇapataye namaḥ । prārthanāṁ samarpayāmi ।

अनया पूजया विघ्नहर्ता महागणपति प्रीयताम्॥

anayā pūjayā vighnahartā mahāgaṇapati prīyatām ।।

दीप स्थापना

dīpa sthāpanā

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये।

अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः॥

atha devasya vāma bhāge dīpa sthāpanaṁ kariṣye ।
agnināgni samidhyate kavirgrahapatiryuvā havyavāt juvāsyaḥ ।।
(light the lamps)

भूमि प्रार्थना

bhūmi prārthanā

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां

पिप्रतान्नो भरीमभिः॥

mahidyau pṛthvīcana imaṁ yajñaṁ mimikṣatāṁ
pipratānno bharīmabhiḥ ||

धान्य राशि

dhānya rāśi

ॐ औषधाय संवदंते सोमेन सहराज्ञ।

यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि॥

om auṣadhāya saṁvadaṁte somena saharājña |
yasmai kṛṇeti brāhmaṇasthaṁ rājan pārayāmasi ||
(Touch the grains/rice/wheat)

कलश स्थापना

kalaśa sthāpanā

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते

उक्तैर्यज्ञेषु वर्धते॥

om ā kalaśeṣu dhāvati pavitre parisiṁcyate
uktairyajñeṣu vardhate ||
(keep kalasha on top of rice pile)

ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य।

असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय॥

om imaṁ me gaṅge yamune sarasvatī śutudristomaṁ sacatā paruṣṇya |
asiknya marudvṛdhe vitasthayārjīkīye śruṇuhyā suṣomaya ||
(fill kalasha with water)

ॐ गंधद्वारां धुरादर्शां नित्य पुष्टां करीषिणीम्।

ईश्वरीं सर्व भूतानां तामि होपह्वयेश्रियम्॥

om gaṁdhadvārāṁ dhurādarśāṁ nitya puṣṭāṁ karīṣiṇīm |
īśvarīṁ sarva bhūtānāṁ tāmi hopahvayeśriyam ||
(sprinkle in/apply ga.ndha to kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि।

बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः॥

om yā phalinīryā aphalā apuṣpāyāśca puṣpāṇi |
bṛhaspati prasotāsthāno mañcatvaṁ hasaḥ ||
(put beetle nut in kalasha)

ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः।

तंभागं चित्रमीमहे॥

om sahiratnāni dāśuṣesuvāti savitā bhagaḥ |
taṁbhāgaṁ citramīmahe ||
(put jewels / washed coin in kalasha)

ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः।

हिरण्ययात् परियोनेर् निषद्या हिरण्यदा ददत्यन् नमस्मै॥

om hiraṇyarūpaḥ hiraṇya sandrigpānna pātsyedu hiraṇya varṇaḥ |
hiraṇyayāt pariyoner niṣadyā hiraṇyadā dadatyan namasmai ||
(put gold / dakShina in kalasha)

ॐ काण्डात् काण्डात् परोहंति परुषः परुषः परि एवानो दूर्वे

प्रतनु सहस्रेण शतेन च॥

om kāṇḍāt kāṇḍāt parohaṁti paruṣaḥ paruṣaḥ pari evāno dūrve
pratanu sahasreṇa śatena ca ||
(put duurva / karika )

ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत।

गो भाज इत्किला सथयत्स नवथ पूरुषम्॥

om aśvatthevo niśadanaṁ parṇevo vasatiśkṛta |
go bhāja itkilā sathayatsa navatha pūruṣam ||
(put five leaves in kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि।

बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः॥

om yā phalinīryā aphalā apuṣpāyāśca puṣpāṇi |
bṛhaspati prasotāsthāno mañcatvaṁ hasaḥ ||
(place coconut on kalasha)

ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः।

तं धीरासः कावयः उन्नयंति स्वाद्धो स्वाद्धो मनसा देवयंतः॥

om yuvāsuvāsaḥ parīvītāgāt sa uśreyān bhavati jāyamānaḥ ।
taṁ dhīrāsaḥ kāvayaḥ unnayaṁti svāddhyo svāddhyo manasā devayaṁtaḥ।।
(tie cloth for kalasha)

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ।

वस्नेव विक्रीणावः इषमूर्जं शतकृतो॥

om pūrṇādarvi parāpata supūrṇā punarāpaṭha ।
vasneva vikrīṇāvaḥ iṣamūrjaṁ śatakṛto ।।
(copper plate and aShTadala with ku.nkuM)

इति कलशं प्रतिष्ठापयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

iti kalaśaṁ pratiṣṭhāpayāmi ।।
sakala pūjārthe akṣatān samarpayāmi ।।

कलश पूजन

kalaśa pūjana
(continue with second kalasha)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।

मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः॥

कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः।

ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः॥

अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः।

अत्र गायत्री सावित्री शांति पुष्टिकरी तथा॥

kalaśasya mukhe viṣṇuḥ kaṇṭhe rudraḥ samāśritaḥ ।
mūle tatra sthito brahma madhye mātṛgaṇāḥ smṛtāḥ ।।
kukṣautu sāgarāḥ sarve sapta dvīpā vasuṁdharāḥ ।
ṛgvedotha yajurvedaḥ sāmavedohyatharvaṇaḥ ।।
aṁgaiśca sahitāḥ sarve kalaśaṁtu samāśritāḥ ।
atra gāyatrī sāvitrī śāṁti puṣṭikarī tathā ।।

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये॥

āyāntu deva pūjārthaṁ abhiṣekārtha siddhaye ।।

ॐ सितासिते सरिते यत्र संगधे तत्राप्लुता सोदिवमुत्पतंति।

ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति॥

om sitāsite sarite yatra saṁgadhe tatrāplutā sodivamutpataṁti ।
ye vaitanvaṁ visrajanti dhīrāste janāso amṛtattvaṁ bhajanti ।।

॥ कलशः प्रार्थनाः॥

।। kalaśaḥ prārthanāḥ ।।

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम्।

योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत्॥

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः।

अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते॥

kalaśaḥ kīrtimāyuṣyaṁ prajñāṁ medhāṁ śriyaṁ balam ।
yogyatāṁ pāpahāniṁ ca puṇyaṁ vṛddhiṁ ca sādhayet ।।
sarva tīrthamayo yasmāt sarva devamayo yataḥ ।
athaḥ haripriyosi tvaṁ pūrṇakuṁbhaṁ namo'stute ।।

कलशदेवताभ्यो नमः।

सकल पूजार्थे अक्षतान् समर्पयामि॥

kalaśadevatābhyo namaḥ ।
sakala pūjārthe akṣatān samarpayāmi ।।

॥ मुद्रा॥

।। mudrā ।।
(Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा।

अमृति करणार्थे धेनु मुद्रा।

पवित्री करणार्थे शङ्ख मुद्रा।

संरक्षणार्थे चक्र मुद्रा।

विपुलमाया करणार्थे मेरु मुद्रा।

nirvīṣi karaṇārthe tārkṣa mudrā ।
amṛti karaṇārthe dhenu mudrā ।
pavitrī karaṇārthe śaṅkha mudrā ।
saṁrakṣaṇārthe cakra mudrā ।
vipulamāyā karaṇārthe meru mudrā ।

शङ्ख पूजन

śaṅkha pūjana
(pour water from kalasha to sha.nkha
add ga.ndha flower)

शङ्खं चंद्रार्क दैवतं मध्ये वरुण देवताम्।

पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीम्॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।

नमितः सर्व देवैश्च पाञ्चजन्यं नमोऽस्तुते॥

śaṅkhaṁ caṁdrārka daivataṁ madhye varuṇa devatām ।
pṛṣṭhe prajāpatiṁ viṁdyād agre gaṁgā sarasvatīm ।।
tvaṁ purā sāgarotpanno viṣṇunā vidhṛtaḥ kare ।
namitaḥ sarva devaiśca pāñcajanyaṁ namo'stute ।।

पाञ्चजन्याय विद्महे। पावमानाय धीमहि।

तन्नो शङ्खः प्रचोदयात्॥

pāñcajanyāya vidmahe । pāvamānāya dhīmahi ।
tanno śaṅkhaḥ pracodayāt ।।

शङ्ख देवताभ्यो नमः।

सकल पूजार्थे अक्षतान् समर्पयामि॥

śaṅkha devatābhyo namaḥ ।
sakala pūjārthe akṣatān samarpayāmi।।

घंटार्चना

ghaṁṭārcanā
(Pour drops of water from sha.nkha on top of the bell
apply ga.ndha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम्।

कुरु घंटारवं तत्र देवतावाहन लांछनम्॥

ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत्।

राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत्।

तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत्।

āgamārthantu devānāṁ gamanārthantu rākṣasām ।
kuru ghaṁṭāravaṁ tatra devatāvāhana lāṁchanam ।।
jñānatho'jñānatovāpi kāṁsya ghaṁṭān navādayet ।
rākṣasānāṁ piśācānāṁ taddeśe vasatirbhavet ।
tasmāt sarva prayatnena ghaṁṭānādaṁ prakārayet ।

घंटा देवताभ्यो नमः।

सकल पूजार्थे अक्षतान् समर्पयामि॥

ghaṁṭā devatābhyo namaḥ ।
sakala pūjārthe akṣatān samarpayāmi ।।

(Ring the gha.nTaa)

आत्मशुद्धि

ātmaśuddhi
( Sprinkle water from sha.nkha
on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा।

यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यंतरः शुचिः॥

apavitro pavitro vā sarva avasthāṁgatopi vā ।
yaḥ smaret puṇḍarīkākṣaṁ saḥ bāhyābhyaṁtaraḥ śuciḥ ।।

गोश्रृन्ग पूजा

gośṛnga pūjā

वायव्ये अर्घ्यम्। नैऋत्ये पाद्यम्।

ईशान्ये आचमनीयम्। आग्नेये मधुपर्कम्।

पूर्वे स्नानीयम्। पश्चिमे पुनराचमनम्।

vāyavye arghyam । nairṭye pādyam ।
īśānye ācamanīyam । āgneye madhuparkam ।
pūrve snānīyam । paścime punarācamanam ।

पञ्चामृत पूजा

pañcāmṛta pūjā
( put tulasi leaves or axataas in vessels )

क्षीरे सोमाय नमः। (keep milk in the centre)

दधिनि वायवे नमः। (curd facing east )

घृते रवये नमः। (Ghee to the south)

मधुनि सवित्रे नमः। ( Honey to west )

शर्करायां विश्वेभ्यो देवेभ्यो नमः। ( Sugar to north)

kṣīre somāya namaḥ । (keep milk in the centre)
dadhini vāyave namaḥ । (curd facing east )
ghṛte ravaye namaḥ । (Ghee to the south)
madhuni savitre namaḥ । ( Honey to west )
śarkarāyāṁ viśvebhyo devebhyo namaḥ । ( Sugar to north)

क्षेत्रपालाय नमः। त्रिपुरसंहर्त्रे नमः।

शान्तिये नमः। तुष्टिये नमः।

ज्ञानाय नमः। धर्माय नमः।

वैराग्याय नमः। वीर्याय नमः।

सत्याय नमः। अज्ञानाय नमः।

अधर्माय नमः। अनैश्वर्याय नमः।

असत्याय नमः। अविराज्ञाय नमः।

द्वारपालक पूजा

dvārapālaka pūjā

पूर्वद्वारे द्वारश्रियै नमः।

असितांग भैरवाय नमः। रुरु भैरवाय नमः।

दक्षिणद्वारे द्वारश्रियै नमः।

चण्ड भैरवाय नमः। क्रोध भैरवाय नमः।

पश्चिमद्वारे द्वारश्रियै नमः।

उन्मत्तभैरवाय नमः। कपाल भैरवाय नमः।

उत्तरद्वारे द्वारश्रियै नमः।

भीषणभैरवाय नमः। संहार भैरवाय नमः।

pūrvadvāre dvāraśriyai namaḥ ।
asiṁtāṁga bhairavāya namaḥ । ruru bhairavāya namaḥ ।
dakṣiṇadvāre dvāraśriyai namaḥ ।
caṇḍa bhairavāya namaḥ । krodha bhairavāya namaḥ ।
paścimadvāre dvāraśriyai namaḥ ।
unmattabhairavāya namaḥ । kapāla bhairavāya namaḥ ।
uttaradvāre dvāraśriyai namaḥ ।
bhīṣaṇabhairavāya namaḥ । saṁhāra bhairavāya namaḥ ।

ब्रह्मणे नमः। विष्णवे नमः।

गङ्गायै नमः। गणपतये नमः।

षण्मुखाय नमः। भृङ्गिनाथाय नमः।

सत्त्वाय नमः। रजसे नमः।

तमसे नमः। मायाय नमः।

पद्माय नमः॥

brahmaṇe namaḥ । viṣṇave namaḥ ।
gaṅgāyai namaḥ । gaṇapataye namaḥ ।
ṣaṇmukhāya namaḥ । bhṛṅgināthāya namaḥ ।
kṣetrapālāya namaḥ । tripurasaṁhartre namaḥ ।

śāntiye namaḥ । tuṣṭiye namaḥ ।
jñānāya namaḥ । dharmāya namaḥ ।
vairāgyāya namaḥ । vīryāya namaḥ ।
satyāya namaḥ । ajñānāya namaḥ ।
adharmāya namaḥ । anaiśvaryāya namaḥ ।
asatyāya namaḥ । avirājñāya namaḥ ।
sattvāya namaḥ । rajase namaḥ ।
tamase namaḥ । māyāya namaḥ ।
padmāya namaḥ ।।

द्वारपालक पूजां समर्पयामि॥

dvārapālaka pūjāṁ samarpayāmi ।।

पीठ पूजा

pīṭha pūjā

आधार शक्त्यै नमः॥ मूलप्रकृते नमः॥

वराहाय नमः॥ अनन्ताय नमः॥

पद्माय नमः॥ नालाय नमः॥

कन्दाय नमः॥ कर्णिकाय नमः॥

पत्रेभ्यो नमः॥ दलेभ्यो नमः॥

केसरेभ्यो नमः॥

ādhāra śaktyai namaḥ ।। mūlaprakṛte namaḥ ।।
varāhāya namaḥ ।। anantāya namaḥ ।।
padmāya namaḥ ।। nālāya namaḥ ।।
kandāya namaḥ ।। karṇikāya namaḥ ।।
patrebhyo namaḥ ।। dalebhyo namaḥ ।।
kesarebhyo namaḥ ।।

मध्ये श्री भवानि शंकराय नमः। पीठ पूजां समर्पयामि॥

madhye śrī bhavāni śaṁkarāya namaḥ।
pīṭha pūjāṁ samarpayāmi ।।

ध्यानं

dhyānaṁ

ॐ ॐ (repeat 15 times)

om om (repeat 15 times)

ध्यायेत् नित्यं महेशं रजतगिरि निभिं चारु चन्द्रावतंसम्।

रत्नाकल्पोज् ज्वलांगं परशुमृगवरा भीति हस्तं प्रसन्नम्॥

पद्मासीनं समन्तात् स्तुतममरगण्येः व्याघ्रकृतिं वसानम्।

विश्वाद्यं विश्ववन्द्यं निखिल भय हरं पंच वक्रं त्रिनेत्रम्॥

dhyāyet nityaṁ maheśaṁ rajatagiri nibhiṁ
cāru candrāvataṁsam ।
ratnākalpoj jvalāṁgaṁ paraśumṛgavarā
bhīti hastaṁ prasannam ।।
padmāsīnaṁ samantāt stutamamaragaṇyeḥ
vyāghrakṛtiṁ vasānam ।
viśvādyaṁ viśvavandyaṁ nikhila bhaya
haraṁ paṁca vaktraṁ trinetram ।।

श्री साम्बसदाशिवाय नमः।

श्री सदाशिवं ध्यायामि॥

śrī sāmbasadāśivāya namaḥ ।
śrī sadāśivaṁ dhyāyāmi ।।

(you can add more related shlokas)

आवाहन

āvāhana
( hold flowers in hand)

व्याघ्र चर्मधरं देवं चिति भस्मनुलेपनम्।

अह्वायां उमाकान्तं नागाभरण भूषितम्॥

vyāghra carmadharaṁ devaṁ citi
bhasmanulepanam ।
ahvāyāṁ umākāntaṁ nāgābharaṇa
bhūṣitam ।।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्॥

om sahasraśīrṣā puruṣaḥ sahasrākṣaḥ
sahasrapāt ।
sa bhūmiṁ viśvato vṛtvā
atyatiṣṭhaddaśāṅgulam ।।

आगच्छ देवदेवेश तेजोराशे जगत्पते।

क्रियमाणां मया पूजां गृहाण सुरसत्तमे॥

āgaccha devadeveśa tejorāśe jagatpate ।
kriyamāṇāṁ mayā pūjāṁ gṛhāṇa
surasattame ।।

ॐ भूः पुरुषं साम्बसदाशिवं आवाहयामि।

ॐ भुवः पुरुषं साम्बसदाशिवं आवाहयामि।

ॐ स्वः पुरुषं साम्बसदाशिवं आवाहयामि।

ॐ भूर्भुवः स्वः साम्बसदाशिवं आवाहयामि॥

om bhūḥ puruṣaṁ sāmbasadāśivaṁ
āvāhayāmi ।
om bhuvaḥ puruṣaṁ sāmbasadāśivaṁ
āvāhayāmi ।
om svaḥ puruṣaṁ sāmbasadāśivaṁ
āvāhayāmi ।
om bhūrbhuvaḥ svaḥ sāmbasadāśivaṁ
āvāhayāmi ।।
(offer flowers to Lord)

ॐ उमाकान्ताय नमः। आवाहयामि॥

om umākāntāya namaḥ । āvāhayāmi ।।

आवाहितो भव। स्थापितो भव। सन्निहितो भव।

सन्निरुद्धो भव। अवकुण्ठिथो भव। सुप्रीतो भव।

सुप्रसन्नो भव। सुमुखो भव। वरदो भव।

प्रसीद प्रसीद॥

āvāhito bhava । sthāpito bhava । sannihito
bhava ।
sanniruddho bhava । avakuṇṭhitho bhava ।
suprīto bhava ।
suprasanno bhava । sumukho bhava ।
varado bhava ।
prasīda prasīda ।।
(show mudras to Lord)

स्वामिन् सर्व जगन्नाथ यावत् पूजावसानकं।

तावत्त्वं प्रीति भावेन लिंगेस्मिन् सन्निधो भव॥

svāmin sarva jagannātha yāvat
pūjāvasānakaṁ ।
tāvattvaṁ prīti bhāvena liṁgesmin
sannidho bhava ।।

आसनं

āsanaṁ

पुरुष एवेदगुं सर्वम् यद्भूतं यच्छ भव्यम्।

उतामृतत्वस्येशानः यदन्नेनातिरोहति॥

puruṣa evedaguṁ sarvam yadbhūtaṁ
yaccha bhavyam ।
utāmṛtatvasyeśānaḥ yadannenātirohati ।।

दिव्य सिंहास नासीनं त्रिनेत्रं वृषवाहनं।

इन्द्रादि देवनमितं ददाम्यासन मुत्तमं॥

divya siṁhāsa nāsīnaṁ trinetraṁ
vṛṣavāhanaṁ ।
indrādi devanamitaṁ dadāmyāsana
muttamaṁ ।।

ॐ गौरि भर्त्रे नमः। आसनं समर्पयामि॥

om gauri bhartre namaḥ । āsanaṁ
samarpayāmi ।।
(offer flowers/axathaas)

पाद्यं

pādyaṁ
(offer water)

एतावानस्य महिमा अतो ज्यायागुंश्च पूरुषः।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥

etāvānasya mahimā ato jyāyāguṁśca
pūruṣaḥ ।
pādo'sya viśvā bhūtāni tripādasyāmṛtaṁ
divi ।।

गङ्गादि सर्व तीर्थेभ्यो मया प्रार्थनया हृतम्।

तोयमे तत् सुख स्पर्शं पाद्यर्थं प्रतिगृह्यताम्॥

gaṅgādi sarva tīrthebhyo mayā prārthanayā
hṛtam ।
toyame tat sukha sparśaṁ pādyarthaṁ
pratigṛhyatām ।।

ॐ गङ्गाधराय नमः। पादोयो पाद्यं समर्पयामि॥

om gaṅgādharāya namaḥ । pādoyo pādyaṁ samarpayāmi ।।

अर्घ्यं

arghyaṁ
(offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः।

ततो विश्वङ्व्यक्रामत् साशनानशने अभि॥

tripādūrdhva udaitpuruṣaḥ
pādo'syehābhavātpunaḥ ।
tato viśvaṅvyakrāmat sāśanānaśane abhi ।।

गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना।

अर्घ्यं गृहाण देवेश भक्ति मे अचलां कुरु॥

gandhodakena puṣpeṇa candanena sugandhinā ।
arghyaṁ gṛhāṇa deveśa bhakti me acalāṁ kuru ।।

ॐ वृष वाहनाय नमः। अर्घ्यं समर्पयामि॥

om vṛṣa vāhanāya namaḥ । arghyaṁ samarpayāmi ।।

आचमनीयं

ācamanīyaṁ
(offer water or akShathaa/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः।

स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः॥

tasmādvirāḍajāyata virājo adhi pūruṣaḥ ।
sa jāto atyaricyata paścādbhūmi matho puraḥ ।।

कर्पूरोक्षीर सुरभि शीतलं विमलं जलं।

गङ्गायास्तु समानीतं गृहाणाचमनीयकं॥

karpūrokṣīra surabhi śītalaṁ vimalaṁ jalaṁ ।
gaṅgāyāstu samānītaṁ gṛhāṇācamanīyakaṁ ।।

ॐ साध्यो जाताय नमः। आचमनीयं समर्पयामि॥

om sādhyo jātāya namaḥ । ācamanīyaṁ samarpayāmi ।।

मधुपर्कं

madhuparkaṁ

नमोस्तु सर्वलोकेश उमादेहार्ध धारिणे।

मधुपर्को मया दत्तो गृहाण जगदीश्वर॥

namostu sarvalokeśa umādehārdha dhāriṇe ।
madhuparko mayā datto gṛhāṇa jagadīśvara ।।

ॐ परमेश्वराय नमः। मधुपर्कं समर्पयामि॥

om parameśvarāya namaḥ । madhuparkaṁ samarpayāmi ।।

स्नानं

snānaṁ

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः॥

yatpuruṣeṇa haviṣā devā yajñamatanvata ।
vasanto asyāsīdājyam grīṣma idhmaśśaraddhaviḥ ।।

गंगाच यमुनाश्चैव नर्मदाश्च सरस्वति।

तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतम्॥

gaṁgāca yamunāścaiva narmadāśca sarasvati ।
tāpi payoṣṇi revaca tābhyaḥ snānārthamāhṛtam ।।

ॐ श्री विश्वेश्वराय नमः। मलापकर्श स्नानं समर्पयामि॥

om śrī viśveśvarāya namaḥ । malāpakarśa snānaṁ samarpayāmi ।।

१. पञ्चामृत स्नानं

१.१ पयः स्नानं (milk bath)

1. pañcāmṛta snānaṁ
1.1 payaḥ snānaṁ (milk bath)

ॐ आप्याय स्व स्वसमेतुते

विश्वतः सोमवृष्ण्यं भवावाजस्य सङधे॥

om āpyāya sva svasametute
viśvataḥ somavṛṣṇyaṁ bhavāvājasya saṅadhe ||

पयस्नानमिदं देव त्रिलोचन वृषद्वज।

गृहाण गौरीरमण त्वद्भक्तेन मय्यार्पितम्॥

payasnānamidaṁ deva trilocana vṛṣadvaja |
gṛhāṇa gaurīramaṇa tvadbhaktena mayyārpitam ||

ॐ शम्भवे नमः। पयः स्नानं समर्पयामि॥

पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om śambhave namaḥ | payaḥ snānaṁ samarpayāmi ||
payaḥ snānānaṁtara śuddhodaka snānaṁ samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

१.२ दधि स्नानं (curd bath)

1.2 dadhi snānaṁ (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः।

सुरभिनो मुखाकरत् प्राण आयुंषितारिषत्॥

om dadhikrāvaṇo akāriṣaṁ jiṣṇoraśvasyavājinaḥ |
surabhino mukhākarat prāṇa āyuṁṣitāriṣat ||

दध्न चैव महादेव स्वप्नं क्रीयते मया।

गृहाण त्वं सुरादीश सुप्रसन्नो भवाव्यय॥

dadhna caiva mahādeva svapnaṁ krīyate mayā |
gṛhāṇa tvaṁ surādīśa suprasanno bhavāvyaya ||

ॐ वामदेवाय नमः। दधि स्नानं समर्पयामि॥

दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om vāmadevāya namaḥ | dadhi snānaṁ samarpayāmi ||
dadhi snānānaṁtara śuddhodaka snānaṁ samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

१.३ घृत स्नानं (ghee bath)

1.3 ghṛta snānaṁ (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम

अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम्॥

om ghṛtaṁ mimikṣe ghṛtamasya yonirghṛte śrito ghṛtaṁvasyadhāma
anuṣṭhadhamāvaha mādayasva svāhākṛtaṁ vṛṣabha vakṣihavyam ||

सर्पीश च महारुद्र स्वप्नं क्रीयते दुन।

गृहाण श्रद्धया दत्तं तव प्रीतार्थमेव च॥

sarpīśa ca mahārudra svapnaṁ krīyate duna |
gṛhāṇa śraddhayā dattaṁ tava prītārthameva ca ||

ॐ अघोराय नमः। घृत स्नानं समर्पयामि॥

घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om aghorāya namaḥ | ghṛta snānaṁ samarpayāmi ||
ghṛta snānānaṁtara śuddhodaka snānaṁ samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

१.४ मधु स्नानं (honey bath)
1.4 madhu snānaṁ (honey bath)

ॐ मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः संतोष्वधीः

मधुनक्ता मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पिता

मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः॥
om madhuvātā ṛtāyathe madhukṣaraṁti
sindhavaḥ mādhvinaḥ saṁtoṣvadhīḥ
madhunaktā muthoṣaso
madhumatvārthivaṁ rajaḥ madhudyau
rastunaḥ pitā
madhumānno vanaspatirmadhumāṁ astu
sūryaḥ mādhvīrgāvo bhavaṁtunaḥ ||

इदं मधु मया दत्तं तव पुष्ट्यर्थमेव च।

गृहाण देवदेवेश ततः शान्तिं प्रयश्च मे॥
idaṁ madhu mayā dattaṁ tava
puṣṭyarthameva ca |
gṛhāṇa devadeveśa tataḥ śāntiṁ prayaśca
me ||

ॐ तत् पुरुषाय नमः। मधु स्नानं समर्पयामि॥

मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥
om tat puruṣāya namaḥ | madhu snānaṁ
samarpayāmi ||
madhu snānānaṁtara śuddhodaka snānaṁ
samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

१.५ शर्करा स्नानं (sugar bath)
1.5 śarkarā snānaṁ (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु

नाम्ने।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः॥
om svāduḥ pavasya divyāya janmane
svādudarindrāya suhavītu nāmne |
svādurmitrāya varuṇāya vāyave
bṛhaspataye madhumā adābhyaḥ ||

सिथया देव देवेश स्नापनं क्रीयते यतः।

ततः संतुष्टिमापन्नः प्रसन्नो वरदो भव॥
sithayā deva deveśa snāpanaṁ krīyate
yataḥ |
tataḥ saṁtuṣṭimāpannaḥ prasanno varado
bhava ||

ॐ ईशानाय नमः। शर्करा स्नानं समर्पयामि।

शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि।

सकल पूजार्थे अक्षतान् समर्पयामि॥
om īśānāya namaḥ | śarkarā snānaṁ
samarpayāmi|
śarkarā snānānaṁtara śuddhodaka snānaṁ
samarpayāmi|
sakala pūjārthe akṣatān samarpayāmi ||

२. गंधोदक स्नानं (Sandlewood water bath)
2. gaṁdhodaka snānaṁ (Sandlewood water
bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीम्।

ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियम्॥
om gaṁdhadvārāṁ durādharśāṁ nitya
puṣpāṁ karīṣiṇīm |
īśvarīṁ sarva bhūtānāṁ tāmi hopa
vhayeśriyam ||

हर चंदन संभूतं हर प्रीतिश्च गौरवात्।

सुरभि प्रिय परमेश गंध स्नानाय गृह्यताम्॥
hara caṁdana saṁbhūtaṁ hara prītiśca
gauravāt |
surabhi priya parameśa gaṁdha snānāya
gṛhyatām ||

ॐ श्री नीलकण्ठाय नमः। गंधोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥
om śrī nīlakaṇṭhāya namaḥ | gaṁdhodaka
snānaṁ samarpayāmi ||

sakala pūjārthe akṣatān samarpayāmi ||

३. अभ्यंग स्नानं (Perfumed Oil bath)

3. abhyaṁga snānaṁ (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान। इयथिर्वाचमरितेव नावम्।

सुमङ्गलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत॥

om kanikradajvanuśaṁ prabhruvāna|
iyathirvācamariteva nāvam |
sumaṅgalaśca śakune bhavāsi mātvā
kācidabhibhāviśvyā vidata ||

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवम्।

सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते॥

abhyaṁgārthaṁ mahīpāla tailaṁ puṣpādi saṁbhavam |
sugaṁdha dravya saṁmiśraṁ saṁgṛhāṇa jagatpate ||

ॐ उमापतये नमः। अभ्यंग स्नानं समर्पयामि।

सकल पूजार्थे अक्षतान् समर्पयामि॥

om umāpataye namaḥ | abhyaṁga snānaṁ samarpayāmi|
sakala pūjārthe akṣatān samarpayāmi ||

४. अंगोद्वर्तनकं (To clean the body)

4. aṁgodvartanakaṁ (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितम्।

लेपनार्थं गृहाणेदं हरिद्रा कुङ्कुमैर्युतम्॥

aṁgodvartanakaṁ deva kastūryādi vimiśritam |
lepanārthaṁ gṛhāṇedaṁ haridrā kuṅkumairyutam ||

ॐ कपर्दिने नमः। अंगोद्वर्तनं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om kapardine namaḥ | aṁgodvartanaṁ samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

५. उष्णोदक स्नानं (Hot water bath)

5. uṣṇodaka snānaṁ (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतम्।

स्नानार्थं च प्रयश्चामि स्वीकुरुश्व दयानिधे॥

nānā tīrthādāhṛtaṁ ca toyamuṣṇaṁ mayākṛtam |
snānārthaṁ ca prayaścāmi svīkuruśva dayānidhe ||

ॐ चन्द्रशेखराय नमः। उष्णोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om candraśekharāya namaḥ | uṣṇodaka snānaṁ samarpayāmi ||
sakala pūjārthe akṣatān samarpayāmi ||

६. शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around

6. śuddhodaka snānaṁ (Pure water bath)
sprinkle water all around

मन्दाकिन्याः समानीतं हेमाम्बोरुहावासितं।

स्नानार्थे मय भक्त्या नीरुं स्वीकुर्यतां विभो॥

mandākinyāḥ samānītaṁ hemāmboruhāvāsitaṁ |
snānārthe maya bhaktyā nīruṁ svīkuryatāṁ vibho ||

ॐ आपोहिष्ठा मयो भुवः। तान ऊर्जे दधातन।

महीरणाय चक्षसे। योवः शिवतमोरसः तस्यभाजयते हनः।

उशतीरिव मातरः। तस्मात् अरंगमामवो। यस्य क्षयाय

जिंवध।

आपो जन यथाचनः॥

om āpohiṣṭā mayo bhuvaḥ । tāna ūrje dadhātana ।
mahīraṇāya cakṣase । yovaḥ śivatamorasaḥ tasyabhājayate hanaḥ ।
uśatīriva mātaraḥ । tasmāt araṁgamāmavo । yasya kṣayāya jiṁvadha ।
āpo jana yathācanaḥ । ।

ॐ हराय नमः। शुद्धोदक स्नानं समर्पयामि॥

सकल पूजार्थे अक्षतान् समर्पयामि॥

om harāya namaḥ । śuddhodaka snānaṁ samarpayāmi । ।
sakala pūjārthe akṣatān samarpayāmi । ।
(after sprinkling water around throw one tulasi leaf to the north)

महा अभिषेकः

mahā abhiṣekaḥ
(Sound the bell, pour water from kalasha)

पुरुष सूक्त

puruṣa sūkta

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्॥ १॥

om sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt ।
sa bhūmiṁ viśvato vṛtvā atyatiṣṭhaddaśāṅgulam । । 1। ।

पुरुष एवेदगुं सर्वम् यद्भूतं यच्छ भव्यम्।

उतामृतत्वस्येशानः यदन्नेनातिरोहति॥ २॥

puruṣa evedaguṁ sarvam yadbhūtaṁ yaccha bhavyam ।
utāmṛtatvasyeśānaḥ yadannenātirohati । । 2। ।

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ ३॥

etāvānasya mahimā ato jyāyāgaṁśca pūruṣaḥ ।
pādo'sya viśvā bhūtāni tripādasyāmṛtaṁ divi । । 3। ।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः।

ततो विश्वङ्व्यक्रामत् साशनानशने अभि॥ ४॥

tripādūrdhva udaitpuruṣaḥ pādo'syehābhavātpunaḥ ।
tato viśvaṅvyakrāmat sāśanānaśane abhi । । 4। ।

तस्माद्विराडजायत विराजो अधि पूरुषः।

स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः॥ ५॥

tasmādvirāḍajāyata virājo adhi pūruṣaḥ ।
sa jāto atyaricyata paścādbhūmi matho puraḥ । । 5। ।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः॥ ६॥

yatpuruṣeṇa haviṣā devā yajñamatanvata ।
vasanto asyāsīdājyam grīṣma idhmaśśaraddhaviḥ । । 6। ।

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः।

देवा यद्यज्ञं तन्वानाः अबध्नन् पुरुषं पशुम्।

saptāsyāsan paridhayaḥ trissapta samidhaḥ kṛtāḥ ।
devā yadyajñaṁ tanvānāḥ abadhnan puruṣaṁ paśum ।

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये॥ ७॥

taṁ yajñaṁ barhiṣi praukṣan puruṣaṁ jātamagrataḥ ।
tena devā ayajanta sādhyā ṛṣayaśca ye । । 7। ।

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।

पशूगुँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये॥ ८॥

tasmādyajñātsarvahutaḥ saṁbhṛtaṁ pṛṣadājyam ।

paśūguṁstāgaṁścakre vāyavyān  āraṇyān grāmyāścaye । । 8। ।

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।

छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत॥ ९॥

tasmādyajñātsarvahutaḥ ṛcaḥ sāmāni jajñire ।
chandāṁgasi jajñire tasmāt yajustasmādajāyata । । 9। ।

तस्मादश्वा अजायन्त ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥ १०॥

tasmādaśvā ajāyanta ye ke cobhayādataḥ ।
gāvo ha jajñire tasmāt tasmājjātā ajāvayaḥ । । 10। ।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।

मुखं किमस्य कौ बाहू कावूरू पादावुच्येते॥ ११॥

yatpuruṣaṁ vyadadhuḥ katidhā vyakalpayan ।
mukhaṁ kimasya kau bāhū kāvūrū pādāvucyete । । 11। ।

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः।

उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ १२॥

brāhmaṇosya mukhamāsīt bāhū rājanyaḥ kṛtaḥ ।
urū tadasya yadvaiśyaḥ padbhyāṁ śūdro ajāyata । । 12। ।

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत।

मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ १३॥

caṁdramā manaso jātaḥ cakṣoḥ sūryo ajāyata ।
mukhādindraścāgniśca prāṇādvāyurajāyata । । 13। ।

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन्॥ १४॥

nābhyā āsīdantarikṣam śīrṣṇo dyauḥ samavartata ।
padabhyāṁ bhūmirdiśaḥ śrotrāt tathā lokāṁga akalpayan । । 14। ।

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसस्तु पारे।

सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन्

यदास्ते॥ १५॥

vedāhametaṁ puruṣaṁ mahāntam ādityavarṇaṁ tamasastu pāre ।
sarvāṇi rūpāṇi vicitya dhīraḥ nāmāni kṛtvā'bhivadan yadāste । ।15। ।

धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः।

तमेवं विद्यानमृत इह भवति नान्यः पन्थायनाय विद्यते॥ १६॥

dhātā purastādyamudājahāra śakraḥ pravidvān pradiśaścatastraḥ ।
tamevaṁ vidyānamṛta iha bhavati nānyaḥ panthāyanāya vidyate । । 16। ।

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥

१७॥

yajñena yajñamayajanta devāḥ tāni dharmāṇi prathamānyāsan ।
te ha nākaṁ mahimānaḥ sacante yatra pūrve sādhyāḥ santi devāḥ । । 17। ।

ॐ श्री रुद्राय नमः। पुरुषसूक्त स्नानं समर्पयामि।॥

om śrī rudrāya namaḥ । puruṣasūkta snānaṁ samarpayāmi। । ।

बलाय श्रियै यशसेनद्याय अमृताभिषेको अस्तु।

शान्तिः पुष्टिः तुष्टिश्चास्तु॥

balāya śriyai yaśasenadyāya amṛtābhiṣeko astu ।
śāntiḥ puṣṭiḥ tuṣṭiścāstu । ।

ॐ पिनाकिने नमः। महा अभिषेक स्नानं समर्पयामि॥

ॐ नमः शिवाय। स्नानानंतर आचमनीयं समर्पयामि॥

om pinākine namaḥ । mahā abhiṣeka
snānaṁ samarpayāmi ।।
om namaḥ śivāya । snānānaṁtara
ācamanīyaṁ samarpayāmi ।।

तर्पणं

tarpaṇaṁ
(Offer water)

ॐ भव देवं तर्पयामि।

ॐ शर्वं देवं तर्पयामि।

ॐ ईशानं देवं तर्पयामि।

ॐ पशुपतिं देवं तर्पयामि।

ॐ उग्रं देवं तर्पयामि।

ॐ रुद्रं देवं तर्पयामि।

ॐ भीमं देवं तर्पयामि।

ॐ महान्तं देवं तर्पयामि।

om bhava devaṁ tarpayāmi ।
om śarvaṁ devaṁ tarpayāmi ।
om īśānaṁ devaṁ tarpayāmi ।
om paśupatiṁ devaṁ tarpayāmi ।
om ugraṁ devaṁ tarpayāmi ।
om rudraṁ devaṁ tarpayāmi ।
om bhīmaṁ devaṁ tarpayāmi ।
om mahāntaṁ devaṁ tarpayāmi ।

प्रतिष्ठापना

pratiṣṭhāpanā

ॐ नमः शिवाय॥ (Repeat 12 times)
om namaḥ śivāya ।। (Repeat 12 times)

ॐ तदस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमेस्तुशस्तम्।

अशीमहि गादमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय॥

ॐ ग्रिहावै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा।

शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते गृहानेवै॥

नानाजिगमिशति ग्रिहाहि पशूनां प्रतिष्ठा प्रतिष्ठा

om tadastu mitrā varuṇā tadagne
samyoraśmabhyamidamestuśastam ।
aśīmahi gādamuta pratiṣṭhāṁ namo dive
brahate sādhanāya ।।
om grihāvai pratiṣṭhāsūktaṁ tat pratiṣṭita
tamayā vācā ।
śaṁ stavyaṁ tasmādyadyapidūra iva paśūn
labhate gṛhānevai ।।
nānājigamiśati grihāhi paśūnāṁ pratiṣṭhā
pratiṣṭhā

ॐ श्री साम्बसदाशिवाय सांगाय सपरिवाराय सायुधाय

सशक्तिकाय नमः। श्री साम्बसदाशिवं सांगं सपरिवारं

सायुधं सशक्तिकं आवाहयामि॥

श्री गौरी सहित श्री साम्बसदाशिवाय नमः॥

सुप्रतिष्ठमस्तु॥

om śrī sāmbasadāśivāya sāṁgāya
saparivārāya sāyudhāya
saśaktikāya namaḥ । śrī sāmbasadāśivaṁ
sāṁgaṁ saparivāraṁ
sāyudhaṁ saśaktikaṁ āvāhayāmi ।।
śrī gaurī sahita śrī sāmbasadāśivāya namaḥ
।।
supratiṣṭhamastu ।।

वस्त्र

( offer two pieces of cloth for the Lord)
vastra
( offer two pieces of cloth for the Lord)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये॥

om taṁ yajñaṁ barhiṣi praukṣan puruṣaṁ
jātamagrataḥ ।
tena devā ayajanta sādhyā ṛṣayaśca ye ।।

वस्त्र सूक्ष्मं दुकूलं च देवानामपि दुर्लभं।

गृहाणतं उमाकान्त प्रसन्नो भव सर्वदा॥

vastra sūkṣmaṁ dukūlaṁ ca devānāmapi
durlabhaṁ ।
gṛhāṇataṁ umākānta prasanno bhava
sarvadā ।।

ॐ शिवाय नमः। वस्त्रयुग्मं समर्पयामि
om śivāya namaḥ । vastrayugmaṁ samarpayāmi

श्री महा गौरी पूजा

.१ कंचुकी
śrī mahā gaurī pūjā
.1 kaṁcukī

नवरत्नाभिर्दधां सौवर्णैश्चैव तंतुभिः।

निर्मितां कंचुकीं भक्त्या गृहाण परमेश्वरी॥

ॐ श्री महा गौर्यै नमः। कंचुकीं समर्पयामि॥
navaratnābhirdadhāṁ sauvarṇaiścaiva taṁtubhiḥ ।
nirmitāṁ kaṁcukīṁ bhaktyā gṛhāṇa parameśvarī । ।
om śrī mahā gauryai namaḥ। kaṁcukīṁ samarpayāmi । ।

.२ कण्ठ सूत्र
.2 kaṇṭha sūtra

मांगल्य तंतुमणिभिः मुक्तैश्चैव विराजितम्।

सौमाङ्गल्य अभिवृध्यर्थं कण्ठसूत्रं ददामि ते॥

ॐ श्री महा गौर्यै नमः। कण्ठसूत्रं समर्पयामि॥
māṁgalya taṁtumaṇibhiḥ muktaiścaiva virājitam ।
saumāṅgalya abhivṛdhyarthaṁ kaṇṭhasūtraṁ dadāmi te । ।
om śrī mahā gauryai namaḥ । kaṇṭhasūtraṁ samarpayāmi । ।

.३ ताडपत्राणि
.3 tāḍapatrāṇi

ताडपत्राणि दिव्याणि विचित्राणि शुभानि च।

कराभरणयुक्तानि मातस्तत्प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः ताडपत्रानि समर्पयामि॥
tāḍapatrāṇi divyāṇi vicitrāṇi śubhāni ca ।
karābharaṇayuktāni mātastatpratigṛhyatām । ।
om śrī mahā gauryai namaḥ tāḍapatrāni samarpayāmi । ।

.४ हरिद्रा
.4 haridrā

हरिद्रा रंजिते देवी सुख सौभाग्य दायिनी।

हरिद्रांते प्रदास्यामि गृहाण परमेश्वरि॥

ॐ श्री महा गौर्यै नमः। हरिद्रा समर्पयामि॥
haridrā raṁjite devī sukha saubhāgya dāyinī ।
haridrāṁte pradāsyāmi gṛhāṇa parameśvari । ।
om śrī mahā gauryai namaḥ । haridrā samarpayāmi । ।

.५ कुङ्कुम
.5 kuṅkuma

कुङ्कुमं कामदां दिव्यं कामिनी काम संभवम्।

कुङ्कुमार्चिते देवि सौभाग्यार्थं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। कुङ्कुमं समर्पयामि॥
kuṅkumaṁ kāmadāṁ divyaṁ kāminī kāma saṁbhavam ।
kuṅkumārcite devi saubhāgyārthaṁ pratigṛhyatām । ।
om śrī mahā gauryai namaḥ । kuṅkumaṁ samarpayāmi । ।

.६ कज्जल
.6 kajjala

सुनील भ्रमराभसं कज्जलं नेत्र मण्डनम्।

मयादत्तमिदं भक्त्या कज्जलं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। कज्जलं समर्पयामि॥

sunīla bhramarābhasaṁ kajjalaṁ netra maṇḍanam ।
mayādattamidaṁ bhaktyā kajjalaṁ pratigṛhyatām ॥
om śrī mahā gauryai namaḥ । kajjalaṁ samarpayāmi ॥

.७ सिंदूर

.7 siṁdūra

विद्युत् कृशानु सङ्काशं जपा कुसुमसन्निभम्।

सिन्दूरंते प्रदास्यामि सौभाग्यं देहि मे चिरम्॥

ॐ श्री महा गौर्यै नमः। सिन्दूरं समर्पयामि॥

vidyut kṛśānu saṅkāśaṁ japā kusumasannibham ।
sindūraṁte pradāsyāmi saubhāgyaṁ dehi me ciram ॥
om śrī mahā gauryai namaḥ । sindūraṁ samarpayāmi ॥

.८ नाना आभरण

.8 nānā ābharaṇa

स्वभावा सुन्दरांगि त्वं नाना रत्न युतानि च।

भूषणानि विचित्राणि प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। नाना आभरणानि समर्पयामि॥

svabhāvā sundarāṁgi tvaṁ nānā ratna yutāni ca ।
bhūṣaṇāni vicitrāṇi prītyarthaṁ pratigṛhyatām ॥
om śrī mahā gauryai namaḥ । nānā ābharaṇāni samarpayāmi ॥

.९ नाना परिमल द्रव्यम्

.9 nānā parimala dravyam

नाना सुगन्धिकं द्रव्यं चूर्णीकृत्य प्रयत्नतः।

ददामि ते नमस्तुभ्यं प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। नाना परिमल द्रव्यं समर्पयामि॥

nānā sugandhikaṁ dravyaṁ cūrṇīkṛtya prayatnataḥ ।
dadāmi te namastubhyaṁ prītyarthaṁ pratigṛhyatām ॥
om śrī mahā gauryai namaḥ । nānā parimala dravyaṁ samarpayāmi ॥

यज्ञोपवीतम्

yajñopavītam

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।

पशूगुँस्तागुंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये॥

tasmādyajñātsarvahutaḥ saṁbhṛtaṁ pṛṣadājyam ।
paśūgum̐stāguṁścakre vāyavyān āraṇyān grāmyāścaye ॥

यज्ञोपवीतं सहजं ब्रह्मणं निर्मितं पुर।

आयुष्यं भव वर्चस्वम् उपवीतं गृहाण मे॥

yajñopavītaṁ sahajaṁ brahmaṇaṁ nirmitaṁ pura ।
āyuṣyaṁ bhava varcasvam upavītaṁ gṛhāṇa me ॥

ॐ श्री सर्वेश्वराय नमः। यज्ञोपवीतं समर्पयामि॥

om śrī sarveśvarāya namaḥ । yajñopavītaṁ samarpayāmi ॥

आभरणं

ābharaṇaṁ

गृहाण नानाभरणानि शम्भो महेश जम्बूनाद निर्मितानि।

ललाट कण्ठोत्तम कर्ण हस्त नितम्ब हस्तांगुलि भूषणानि॥

gṛhāṇa nānābharaṇāni śambho maheśa jambūnāda nirmitāni ।
lalāṭa kaṇṭhottama karṇa hasta nitamba hastāṁguli bhūṣaṇāni ॥

ॐ शिवाय नमः। आभरणानि समर्पयामि॥

om śivāya namaḥ । ābharaṇāni samarpayāmi ।।

गन्धम्

gandham

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।

छन्दाँगुसि जज्ञिरे तस्मात् यजुस्तस्मादजायत॥

tasmādyajñātsarvahutaḥ ṛcaḥ sāmāni jajñire ।
chandāṁgusi jajñire tasmāt yajustasmādajāyata ।।

गन्धं गृहाण देवेश कस्तूरि कुङ्कुमान्वितम्।

विलेपनार्थं कर्पूररोचन लोहितं मया॥

gandhaṁ gṛhāṇa deveśa kastūri kuṅkumānvitam ।
vilepanārthaṁ karpūrarocana lohitaṁ mayā ।।

ॐ श्री हराय नमः। गन्धं समर्पयामि॥

om śrī harāya namaḥ । gandhaṁ samarpayāmi ।।

नाना परिमल द्रव्यम्

nānā parimala dravyam

ॐ अहिरैव भोग्येः पर्येति बाहुं जाया हेतिं परिभादमानः।

हस्तज्ञो विश्वावयुनानि विद्वान्पुमास्प्रमांसं परिपातु विश्वतः॥

om ahiraiva bhogyeḥ paryeti bāhuṁ jāyā hetiṁ paribhādamānaḥ ।
hastajño viśvāvayunāni vidvānpumāspramāṁsaṁ paripātu viśvataḥ ।।

ॐ श्री महेश्वराय नमः। नाना परिमल द्रव्यं समर्पयामि॥

om śrī maheśvarāya namaḥ । nānā parimala dravyaṁ samarpayāmi ।।

अक्षत

akṣata

तस्मादश्वा अजायन्त ये के चो भयादतः।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥

tasmādaśvā ajāyanta ye ke co bhayādataḥ ।
gāvo ha jajñire tasmāt tasmājjātā ajāvayaḥ ।।

अक्षतान् धवलान् शुभ्रान् कर्पूरागुरु मिश्रितान्।

गृहाण परया भक्त्या मया तुभ्यं समर्पितान्॥

akṣatān dhavalān śubhrān karpūrāguru miśritān ।
gṛhāṇa parayā bhaktyā mayā tubhyaṁ samarpitān ।।

श्री शर्वाय नमः। अक्षतान् समर्पयामि॥

śrī śarvāya namaḥ । akṣatān samarpayāmi ।।

पुष्प

puṣpa

बिल्वापमार्ग धत्तूर करवीरार्क सम्भवैः।

बकोत्फलद्रोण मुख्यैः पुष्पै पूजित शंकर॥

bilvāpamārga dhattūra karavīrārka sambhavaiḥ ।
bakotphaladroṇa mukhyaiḥ puṣpai pūjita śaṁkara ।।

ॐ श्री भवाय नमः। पुष्पाणि समर्पयामि॥

om śrī bhavāya namaḥ । puṣpāṇi samarpayāmi ।।

अथाङ्गपूजाः

athāṅgapūjāḥ

ॐ शिवाय नमः। पादौ पूजयामि॥

ॐ व्योमात्मने नमः। गुल्फौ पूजयामि॥

ॐ अनन्तैश्वर्य नाथाय नमः। जानुनी पूजयामि॥

ॐ प्रधानाय नमः। जंघे पूजयामि॥

ॐ अनन्त विराजसिंहाय नमः। ऊरून् पूजयामि॥

om śivāya namaḥ । pādau pūjayāmi ।।
om vyomātmane namaḥ । gulphau pūjayāmi ।।
om anantaiśvarya nāthāya namaḥ । jānunī pūjayāmi ।।
om pradhānāya namaḥ । jaṁghe pūjayāmi ।।
om ananta virājasiṁhāya namaḥ । ūrūn pūjayāmi ।।

ॐ ज्ञान भूताय नमः। गुह्यं पूजयामि॥

ॐ सत्यसेव्याय नमः। जघनं पूजयामि॥

ॐ अनन्तधर्माय नमः। कटिं पूजयामि॥

ॐ रुद्राय नमः। उदरं पूजयामि॥

ॐ सत्यधराय नमः। हृदयं पूजयामि॥

om jñāna bhūtāya namaḥ । guhyaṁ pūjayāmi ।।
om satyasevyāya namaḥ । jaghanaṁ pūjayāmi ।।
om anantadharmāya namaḥ । kaṭiṁ pūjayāmi ।।
om rudrāya namaḥ । udaraṁ pūjayāmi ।।
om satyadharāya namaḥ । hṛdayaṁ pūjayāmi ।।

ॐ ईशाय नमः। पार्श्वौ पूजयामि॥

ॐ तत्पुरुषाय नमः। पृष्ठदेहं पूजयामि॥

ॐ अघोरहृदयाय नमः। स्कन्धौ पूजयामि॥

ॐ व्योमकेशात्मरूपाय नमः। बाहून् पूजयामि॥

ॐ हराय नमः। हस्तान् पूजयामि॥

om īśāya namaḥ । pārśvau pūjayāmi ।।
om tatpuruṣāya namaḥ । pṛṣṭhadehaṁ pūjayāmi ।।
om aghorahṛdayāya namaḥ । skandhau pūjayāmi ।।
om vyomakeśātmarūpāya namaḥ । bāhūn pūjayāmi ।।
om harāya namaḥ । hastān pūjayāmi ।।

ॐ चतुर्भाववे नमः। कण्ठं पूजयामि॥

ॐ वामदेवाय नमः। वदनं पूजयामि॥

ॐ पिनाकहस्ताय नमः। नासिकां पूजयामि॥

ॐ श्रीकण्ठाय नमः। श्रोत्रे पूजयामि॥

ॐ इन्दुमुखाय नमः। नेत्राणि पूजयामि॥

om caturbhāvave namaḥ । kaṇṭhaṁ pūjayāmi ।।
om vāmadevāya namaḥ । vadanaṁ pūjayāmi ।।
om pinākahastāya namaḥ । nāsikāṁ pūjayāmi ।।
om śrīkaṇṭhāya namaḥ । śrotre pūjayāmi ।।
om indumukhāya namaḥ । netrāṇi pūjayāmi ।।

ॐ हरये नमः। भ्रवौ पूजयामि॥

ॐ सद्योजातवेदाय नमः। भ्रूमध्यं पूजयामि॥

ॐ वामदेवाय नमः। ललाटं पूजयामि॥

ॐ सर्वात्मने नमः। शिरः पूजयामि॥

ॐ चन्द्रमौलये नमः। मौलिं पूजयामि॥

om haraye namaḥ । bhravau pūjayāmi ।।
om sadyojātavedāya namaḥ । bhrūmadhyaṁ pūjayāmi ।।
om vāmadevāya namaḥ । lalāṭaṁ pūjayāmi ।।
om sarvātmane namaḥ । śiraḥ pūjayāmi ।।
om candramaulaye namaḥ । mauliṁ pūjayāmi ।।

ॐ सदाशिवाय नमः। सर्वाङ्गाणि पूजयामि॥

om sadāśivāya namaḥ । sarvāṅgāṇi pūjayāmi ।।

अथ पुष्प पूजा

atha puṣpa pūjā

ॐ शर्वाय नमः। करवीर पुष्पं समर्पयामि॥

ॐ भवनाशनाय नमः। जाजी पुष्पं समर्पयामि॥

ॐ महादेवाय नमः। चम्पक पुष्पं समर्पयामि॥

ॐ उग्राय नमः। वकुल पुष्पं समर्पयामि॥

ॐ उग्रनाभाय नमः। शतपत्र पुष्पं समर्पयामि॥

om śarvāya namaḥ । karavīra puṣpaṁ samarpayāmi ।।
om bhavanāśanāya namaḥ । jājī puṣpaṁ samarpayāmi ।।
om mahādevāya namaḥ । campaka puṣpaṁ samarpayāmi ।।
om ugrāya namaḥ । vakula puṣpaṁ samarpayāmi ।।
om ugranābhāya namaḥ । śatapatra puṣpaṁ samarpayāmi ।।

ॐ भवाय नमः। कल्हार पुष्पं समर्पयामि॥

ॐ शशिमौलिने नमः। सेवन्तिका पुष्पं समर्पयामि॥

ॐ रुद्राय नमः। मल्लिका पुष्पं समर्पयामि॥

ॐ नीलकण्ठाय नमः। इरुवंतिका पुष्पं समर्पयामि॥

ॐ शिवाय नमः। गिरिकर्णिका पुष्पं समर्पयामि॥

ॐ भवहारिणे नमः। आथसी पुष्पं समर्पयामि॥

om bhavāya namaḥ । kalhāra puṣpaṁ samarpayāmi ।।
om śaśimauline namaḥ । sevantikā puṣpaṁ samarpayāmi ।।
om rudrāya namaḥ । mallikā puṣpaṁ samarpayāmi ।।
om nīlakaṇṭhāya namaḥ । iruvaṁtikā puṣpaṁ samarpayāmi ।।
om śivāya namaḥ । girikarṇikā puṣpaṁ samarpayāmi ।।
om bhavahāriṇe namaḥ । āthasī puṣpaṁ samarpayāmi ।।

बिल्वापमार्ग धत्तूर करवीरार्क सम्भवैः।

बकोत्फलद्रोण मुख्यैः पुष्पै पूजित शंकर॥

bilvāpamārga dhattūra karavīrārka sambhavaiḥ ।
bakotphaladroṇa mukhyaiḥ puṣpai pūjita śaṁkara ।।

भवाय नमः। नानाविधपुष्पाणि समर्पयामि॥

bhavāya namaḥ । nānāvidhapuṣpāṇi samarpayāmi ।।

अथ पत्र पूजा

atha patra pūjā

ॐ महादेवाय नमः। बिल्व पत्रं समर्पयामि॥

ॐ महेश्वराय नमः। जाजी पत्रं समर्पयामि॥

ॐ शंकराय नमः। चम्पका पत्रं समर्पयामि॥

ॐ वृषभध्वजाय नमः। तुलसी पत्रं समर्पयामि॥

ॐ शूलपाणिने नमः। दूर्वा युग्मं समर्पयामि॥

om mahādevāya namaḥ । bilva patraṁ samarpayāmi ।।
om maheśvarāya namaḥ । jājī patraṁ samarpayāmi ।।
om śaṁkarāya namaḥ । campakā patraṁ samarpayāmi ।।
om vṛṣabhadhvajāya namaḥ । tulasī patraṁ samarpayāmi ।।
om śūlapāṇine namaḥ । dūrvā yugmaṁ samarpayāmi ।।

ॐ कामाङ्ग नाशनाय नमः। सेवंतिका पत्रं समर्पयामि॥

ॐ देवदेवेशाय नमः। मरुग पत्रं समर्पयामि॥

ॐ श्रीकण्ठाय नमः। दवन पत्रं समर्पयामि॥

ॐ ईश्वराय नमः। करवीर पत्रं समर्पयामि॥

ॐ पार्वतीपतये नमः। विष्णुक्रान्ति पत्रं समर्पयामि॥

ॐ रुद्राय नमः। माचि पत्रं समर्पयामि॥

om kāmāṅga nāśanāya namaḥ । sevaṁtikā patraṁ samarpayāmi ।।
om devadeveśāya namaḥ । maruga patraṁ samarpayāmi ।।
om śrīkaṇṭhāya namaḥ । davana patraṁ

samarpayāmi ||
om īśvarāya namaḥ | karavīra patraṁ samarpayāmi ||
om pārvatīpataye namaḥ | viṣṇukrānti patraṁ samarpayāmi ||
om rudrāya namaḥ | māci patraṁ samarpayāmi ||

ॐ सदाशिवाय नमः। सर्वपत्राणि समर्पयामि।

om sadāśivāya namaḥ | sarvapatrāṇi samarpayāmi |

आवरण पूजा

.१ प्रथमावरण पूजा

āvaraṇa pūjā
.1 prathamāvaraṇa pūjā

देवस्य पश्चिमे सद्योजाताय नमः।

उत्तरे वामदेवाय नमः।

दक्षिणे अघोराय नमः।

पूर्वे तत्पुरुषाय नमः।

ऊर्ध्वं ईशानाय नमः।

devasya paścime sadyojātāya namaḥ |
uttare vāmadevāya namaḥ |
dakṣiṇe aghorāya namaḥ |
pūrve tatpuruṣāya namaḥ |
ūrdhvaṁ īśānāya namaḥ |

.२ द्वितीयावरण पूजा

.2 dvitīyāvaraṇa pūjā

आग्नेय कोणे हृदयाय नमः।

ईशानकोणे शिरसे स्वाहा।

नैऋत्य कोणे शिखायै वौषट्।

वायव्य कोणे कवचाय हुं।

अग्रे नेत्रत्रयाय वौषट्।

दिक्षु अस्त्राय फट्।

āgneya koṇe hṛdayāya namaḥ |
īśānakoṇe śirase svāhā |
nairṛtya koṇe śikhāyai vauṣaṭ |
vāyavya koṇe kavacāya huṁ |
agre netratrayāya vauṣaṭ |
dikṣu astrāya phaṭ |

(right hand round the head and quickly sound a clap
- thus you close all directions)

.३ तृतीयावरण पूजा

.3 tṛtīyāvaraṇa pūjā

प्राच्यां अनन्ताय नमः।

आवाच्यां सूक्ष्माय नमः।

प्रतीच्यां शिवोत्तमाय नमः।

उदिच्यां एकनेत्राय नमः।

ईशान्यां एकरुद्राय नमः।

आग्नेयां त्रै मूर्तये नमः।

नैऋत्यां श्रीकण्ठाय नमः।

वायव्यां शिखन्दिने नमः।

prācyāṁ anantāya namaḥ |
āvācyāṁ sūkṣmāya namaḥ |
pratīcyāṁ śivottamāya namaḥ |
udicyāṁ ekanetrāya namaḥ |
īśānyāṁ ekarudrāya namaḥ |
āgneyāṁ trai mūrtaye namaḥ |
nairṛtyāṁ śrīkaṇṭhāya namaḥ |
vāyavyāṁ śikhandine namaḥ |

.४ चतुर्थावरण पूजा

.4 caturthāvaraṇa pūjā

उत्तरे दिग्दले उमायै नमः।

ईशान दिग्दले चण्डेश्वराय नमः।

पूर्व दिग्दले नन्दीश्वराय नमः।

आग्नेय दिग्दले महाकालाय नमः।

दक्षिण दिग्दले वृषभाय नमः।

नैऋत्य दिग्दले गणेश्वराय नमः।

पश्चिम दिग्दले भृंघीशाय नमः।

वायव्य दिग्दले महासेनाय नमः।

uttare digdale umāyai namaḥ ।
īśāna digdale caṇḍeśvarāya namaḥ ।
pūrva digdale nandīśvarāya namaḥ ।
āgneya digdale mahākālāya namaḥ ।
dakṣiṇa digdale vṛṣabhāya namaḥ ।
nairṛtya digdale gaṇeśvarāya namaḥ ।
paścima digdale bhṛṁghīśāya namaḥ ।
vāyavya digdale mahāsenāya namaḥ ।

.५ पंचमावरण पूजा

.5 paṁcamāvaraṇa pūjā

इंद्राय नमः। अग्नये नमः।

यमाय नमः। नैऋतये नमः।

वरुणाय नमः। वायव्ये नमः।

कुबेराय नमः। ईशानाय नमः।

ब्राह्मणे नमः। अनंताय नमः।

iṁdrāya namaḥ । agnaye namaḥ ।
yamāya namaḥ । nairṛtaye namaḥ ।
varuṇāya namaḥ । vāyavye namaḥ ।
kuberāya namaḥ । īśānāya namaḥ ।
brāhmaṇe namaḥ । anaṁtāya namaḥ ।

.६ षष्ठावरण पूजा

.6 ṣaṣṭhāvaraṇa pūjā

वज्राय नमः। शक्तये नमः।

दण्डाय नमः। खड्गाय नमः।

पाशाय नमः। अंकुशाय नमः।

गधायै नमः। त्रिशूलाय नमः।

पद्माय नमः। चक्राय नमः।

vajrāya namaḥ । śaktaye namaḥ ।
daṇḍāya namaḥ । khaḍgāya namaḥ ।
pāśāya namaḥ । aṁkuśāya namaḥ ।
gadhāyai namaḥ । triśūlāya namaḥ ।
padmāya namaḥ । cakrāya namaḥ ।

सर्वेभ्यो आवरण देवताभ्यो नमः।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि॥

sarvebhyo āvaraṇa devatābhyo namaḥ ।
sarvopacārārthe gandhākṣata puṣpāṇi samarpayāmi।।

अष्टोत्तरशतनाम पूजा

aṣṭottaraśatanāma pūjā

॥ ॐ॥

शिवाय नमः। महेश्वराय नमः।

शंभवे नमः। पिनाकिने नमः।

शशिशेखराय नमः। वामदेवाय नमः।

विरूपाक्षाय नमः। कपर्दिने नमः।

नीललोहिताय नमः। शंकराय नमः।

।। om ।।
śivāya namaḥ । maheśvarāya namaḥ ।
śaṁbhave namaḥ । pinākine namaḥ ।
śaśiśekharāya namaḥ । vāmadevāya namaḥ ।
virūpākṣāya namaḥ । kapardine namaḥ ।
nīlalohitāya namaḥ । śaṁkarāya namaḥ ।

मृगपाणये नमः। जटाधराय नमः।

कैलासवासिने नमः। कवचिने नमः।

कठोराय नमः। त्रिपुरान्तकाय नमः।

वृषांकाय नमः। वृषभारूढाय नमः।

mṛgapāṇaye namaḥ । jaṭādharāya namaḥ ।
kailāsavāsine namaḥ । kavacine namaḥ ।
kaṭhorāya namaḥ । tripurāntakāya namaḥ ।
vṛṣāṁkāya namaḥ । vṛṣabhārūḍhāya namaḥ ।

कृत्तिवाससे नमः। पुरारातये नमः।

भगवते नमः। प्रमथाधिपाय नमः।

kṛttivāsase namaḥ | purārātaye namaḥ |
bhagavate namaḥ | pramathādhipāya namaḥ |

इति अष्टोत्तर पूजां समर्पयामि॥

iti aṣṭottara pūjāṁ samarpayāmi ||

धूपं

dhūpaṁ

वनस्पत्युद्भवो दिव्यो गन्धाढ्यो गन्धवुत्तमः।

आघ्रेयः महिपालो धूपोयं प्रतिगृह्यताम्॥

vanaspatyudbhavo divyo gandhāḍhyo gandhavuttamaḥ |
āghreyaḥ mahipālo dhūpoyaṁ pratigṛhyatām ||

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।

मुखं किमस्य कौ बाहू कावूरू पादावुच्येते॥

yatpuruṣaṁ vyadadhuḥ katidhā vyakalpayan |
mukhaṁ kimasya kau bāhū kāvūrū pādāvucyete ||

ॐ बलाय नमः। ॐ शिवाय नमः। धूपं आघ्रापयामि॥

om balāya namaḥ | om śivāya namaḥ | dhūpaṁ āghrāpayāmi ||

दीपं

dīpaṁ

दीपं हि परमं शम्भो घृत प्रज्वलितं मया।

दत्तं गृहाण देवेश मम ज्ञानप्रद भव॥

dīpaṁ hi paramaṁ śambho ghṛta prajvalitaṁ mayā |
dattaṁ gṛhāṇa deveśa mama jñānaprada bhava ||

भक्त्या दीपं प्रयश्चामि देवाय परमात्मने।

त्राहि मां नरकात् घोरात् दीपं ज्योतिर् नमोस्तुते॥

bhaktyā dīpaṁ prayaścāmi devāya paramātmane |
trāhi māṁ narakāt ghorāt dīpaṁ jyotir namostute ||

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः।

उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

brāhmaṇosya mukhamāsīt bāhū rājanyaḥ kṛtaḥ |
urū tadasya yadvaiśyaḥ padbhyāṁ śūdro ajāyata ||

ॐ श्री बलप्रमथनाय नमः। ॐ नमः शिवाय। दीपं दर्शयामि॥

om śrī balapramathanāya namaḥ | om namaḥ śivāya | dīpaṁ darśayāmi ||

नैवेद्यं

naivedyaṁ

(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. ; remove lid and sprinkle water around the vessel; place in each food item one washed leaf/flower/axatha)

ॐ सदाशिवाय विद्महे महादेवाय धीमहि।

तन्नो शंकर प्रचोदयात्॥

om sadāśivāya vidmahe mahādevāya dhīmahi |
tanno śaṁkara pracodayāt ||

ॐ नमः शिवाय॥

om namaḥ śivāya ||
(show mudras)

निर्विषिकरणार्थे तार्क्ष मुद्रा।

अमृती करणार्थे धेनु मुद्रा।

पवित्रीकरणार्थे शङ्ख मुद्रा।

संरक्षणार्थं चक्र मुद्रा।

विपुलमाया करणार्थे मेरु मुद्रा।

nirvīṣikaraṇārthe tārkṣa mudrā ।
amṛtī karaṇārthe dhenu mudrā ।
pavitrīkaraṇārthe śaṅkha mudrā ।
saṁrakṣaṇārthaṁ cakra mudrā ।
vipulamāyā karaṇārthe meru mudrā ।

Touch naivedya and chant 9 times ॐ
Touch naivedya and chant 9 times om

ॐ सत्यंतवर्तेन परिसिञ्चामि

om satyaṁtavartena parisiñcāmi
(sprinkle water around the naivedya)

भोः स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य

bhoḥ svāmin bhojanārthaṁ āgaścādi vijñāpya
(request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणकचिते गोघृतां

सुपक्वां भक्ष्यां भोज्यां च लेह्यानपि

सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं

समधु दधि घृतं क्षीर पाणीय युक्तं

तांबूलं चापि शिवं प्रतिदिवसमहं मनसे चिन्तयामि॥

sauvarṇe sthālivairye maṇigaṇakacite goghṛtāṁ
supakvāṁ bhakṣyāṁ bhojyāṁ ca lehyānapi
sakalamahaṁ joṣyamna nīdhāya nānā śākai rūpetaṁ
samadhu dadhi ghṛtaṁ kṣīra pāṇīya yuktaṁ
tāṁbūlaṁ cāpi śivaṁ pratidivasamahaṁ manase cintayāmi ॥

अद्य तिष्ठति यत्किन्चित् कल्पितश्चापरंगृहे

पक्वान्नं च पानीयं यथोपस्कर संयुतं

यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः

तत्सर्वं शिवपूजास्तु प्रयतां मे महेश्वर

सुधारसं सुविफुलं आपोषणमिदं

तव गृहाण कलशानीतं यथेष्टमुप भुज्यताम्॥

adya tiṣṭhati yatkincit kalpitaścāparaṁgṛhe
pakvānnaṁ ca pānīyaṁ yathopaskara saṁyutaṁ
yathākālaṁ manuṣyārthe mokṣyamānaṁ śarīribhiḥ
tatsarvaṁ śivapūjāstu prayatāṁ me maheśvara
sudhārasaṁ suviphulaṁ āpoṣaṇamidaṁ
tava gṛhāṇa kalaśānītaṁ yatheṣṭamupa bhujjyatām ॥

ॐ नमः शिवाय। अमृतोपस्तरणमसि स्वाहा॥

om namaḥ śivāya । amṛtopastaraṇamasi svāhā ॥
(drop water from sha.nkha)

ॐ प्राणात्मने स्वाहा।

ॐ अपानात्मने स्वाहा।

ॐ व्यानात्मने स्वाहा।

ॐ उदानात्मने स्वाहा।

ॐ समानात्मने स्वाहा।

om prāṇātmane svāhā ।
om apānātmane svāhā ।
om vyānātmane svāhā ।
om udānātmane svāhā ।
om samānātmane svāhā ।

ॐ नमः शिवाय।

om namaḥ śivāya ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः।

ईप्सितं मे वरं देहि इहत्र च परां गतिम्॥

naivedyaṁ gṛhyatāṁ deva bhakti me acalāṁ kuruḥ ।
īpsitaṁ me varaṁ dehi ihatra ca parāṁ

gatim । ।

श्री सदाशिवं नमस्तुभ्यं महा नैवेद्यं उत्तमम्।

संगृहाण सुरश्रेष्ठ भक्ति मुक्ति प्रदायकम्॥

śrī sadāśivaṁ namastubhyaṁ mahā naivedyaṁ uttamam ।
saṁgṛhāṇa suraśreṣṭha bhakti mukti pradāyakam । ।

नैवेद्यं समर्पयामि॥

naivedyaṁ samarpayāmi । ।

(cover face with cloth and chant गायत्री मंत्र

five times or repeat 12 times ॐ नमः शिवाय )

(cover face with cloth and chant gāyatrī maṁtra
five times or repeat 12 times om namaḥ śivāya )

सर्वत्र अमृतोपिधान्यमसि स्वाहा।

ॐ नमः शिवाय। उत्तरापोषणं समर्पयामि॥

sarvatra amṛtopidhānyamasi svāhā ।
om namaḥ śivāya । uttarāpoṣaṇaṁ samarpayāmi । ।

(Let flow water from sha.nkha)

महा फलं

mahā phalaṁ
(put tulsi / axathaa on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्तव।

तेन मे सफलावाप्तिर् भवेत् जन्मनि जन्मनि॥

idaṁ phalaṁ mayādeva sthāpitaṁ puratastava ।
tena me saphalāvāptir bhavet janmani janmani । ।

ॐ शिवाय नमः। महाफलं समर्पयामि।

om śivāya namaḥ । mahāphalaṁ samarpayāmi ।

फलाष्टक

(put tulsi/axata on fruits)
phalāṣṭaka
(put tulsi/axata on fruits)

कूष्माण्ड मातुलिङ्गं च नारिकेलफलानि च।

गृहाण पार्वतीकान्त सोमेश प्रतिगृह्यताम्॥

kūṣmāṇḍa mātuliṅgaṁ ca nārikelaphalāni ca ।
gṛhāṇa pārvatīkānta someśa pratigṛhyatām । ।

ॐ केदारेश्वराय नमः। फलाष्टकं समर्पयामि॥

om kedāreśvarāya namaḥ । phalāṣṭakaṁ samarpayāmi । ।

करोद्वर्तनम्

karodvartanam

करोद्वर्तन्कं देवमया दत्तं हि भक्तितः।

चारु चंद्र प्रभां दिव्यां गृहाण जगदीश्वर॥

karodvartankaṁ devamayā dattaṁ hi bhaktitaḥ ।
cāru caṁdra prabhāṁ divyāṁ gṛhāṇa jagadīśvara । ।

ॐ श्री शंकराय नमः।

करोद्वर्तनार्थे चंदनं समर्पयामि॥

om śrī śaṁkarāya namaḥ ।
karodvartanārthe caṁdanaṁ samarpayāmi । ।

तांबूलं

tāṁbūlaṁ

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम्।

ताम्बूलं गृह्यतां देव येल लवङ्ग संयुक्तम्॥

pūgiphalaṁ satāṁbūlaṁ nāgavalli dalairyutam ।

tāmbūlaṁ gṛhyatāṁ deva yela lavaṅga saṁyuktam | |

ॐ मनोन्मयाय नमः। पूगिफल ताम्बूलं समर्पयामि॥

om manonmayāya namaḥ | pūgiphala tāmbūlaṁ samarpayāmi | |

दक्षिणा

dakṣiṇā

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः।

अनंत पुण्य फलदा अथः शांतिं प्रयश्च मे॥

hiraṇya garbha garbhastha hemabīja vibhāvasoḥ |
anaṁta puṇya phaladā athaḥ śāṁtiṁ prayaśca me | |

ॐ श्री शिवाय नमः। सुवर्ण पुष्प दक्षिणां समर्पयामि॥

om śrī śivāya namaḥ | suvarṇa puṣpa dakṣiṇāṁ samarpayāmi | |

महा नीराजन

mahā nīrājana

चक्षुर्दां सर्वलोकानां तिमिरस्य निवारणम्।

अर्थिक्यं कल्पितं भक्त्या गृहाण परमेश्वर॥

cakṣurdāṁ sarvalokānāṁ timirasya nivāraṇam |
arthikyaṁ kalpitaṁ bhaktyā gṛhāṇa parameśvara | |

श्रीयै जातः श्रिय अनिरियाय श्रियं वयो जरित्रभ्यो ददाति

श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा मितद्रौ

श्रिय येवैनं तत् श्रिया मादधाति संतत मृचा वषट्कृत्यं

संततं संधीयते प्रजया पशुभिः ययेवं वेद॥

śrīyai jātaḥ śriya aniriyāya śriyaṁ vayo jaritrabhyo dadāti
śriyaṁ vasānā amṛtattva māyan bhavaṁti satyā samidhā mitadrau
śriya yevainaṁ tat śriyā mādadhāti saṁtata mṛcā vaṣaṭkṛtyaṁ
saṁtataṁ saṁdhīyate prajayā paśubhiḥ yayevaṁ veda | |

ॐ नमः शिवाय। महानीराजनं दीपं समर्पयामि॥

om namaḥ śivāya | mahānīrājanaṁ dīpaṁ samarpayāmi | |

कर्पूर दीप

karpūra dīpa

अर्चत प्रार्चत प्रिय मे दासो अर्चत।

अर्चन्तु पुत्र का वतपुरन्न धृष्ण वर्चत॥

arcata prārcata priya me dāso arcata |
arcantu putra kā vatapuranna dhṛṣṇa varcata | |

कर्पूरकं महाराज रंभोद्भूतं च दीपकम्।

मङ्गलार्थं महीपाल सङ्गृहाण जगत्पते॥

karpūrakaṁ mahārāja raṁbhodbhūtaṁ ca dīpakam |
maṅgalārthaṁ mahīpāla saṅgṛhāṇa jagatpate | |

ॐ नमः शिवाय। कर्पूर दीपं समर्पयामि॥

om namaḥ śivāya| karpūra dīpaṁ samarpayāmi | |

प्रदक्षिणा

pradakṣiṇā

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन्॥

nābhyā āsīdantarikṣam śīrṣṇo dyauḥ samavartata |
padbhyāṁ bhūmirdiśaḥ śrotrāt tathā lokāṁga akalpayan | |

यानि कानि च पापानि जन्मांतर कृतानि च।

तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे॥

yāni kāni ca pāpāni janmāṁtara kṛtāni ca ।
tāni tāni vinaśyanti pradakṣiṇe pade pade ।।

प्रदक्षिण त्रियं देव प्रयत्नेन मया कृतं।

तेन पापाणि सर्वाणि विनाशाय नमोऽस्तुते॥

pradakṣiṇa triyaṁ deva prayatnena mayā kṛtaṁ ।
tena pāpāṇi sarvāṇi vināśāya namo'stute ।।

ॐ नमः शिवाय। प्रदक्षिणान् समर्पयामि॥

om namaḥ śivāya । pradakṣiṇān samarpayāmi ।।

नमस्कार

namaskāra

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः।

देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम्॥

saptāsyāsan paridhayaḥ trissapta samidhaḥ kṛtāḥ ।
devā yadyajñaṁ tanvānāḥ abadhnanpuruṣaṁ paśum ।।

नमस्ते सर्वलोकेश नमस्ते जगदीश्वर।

नमस्तेस्तु पर ब्रह्म नमस्ते परमेश्वर॥

हेतवे जगतावेव संसारार्णव सेतवे।

प्रभवे सर्वविद्यानां शम्भवे गुरुवे नमः॥

namaste sarvalokeśa namaste jagadīśvara ।
namastestu para brahma namaste parameśvara ।।
hetave jagatāveva saṁsārārṇava setave ।
prabhave sarvavidyānāṁ śambhave guruve namaḥ ।।

नमो नमो शम्भो नमो नमो जगत्पते।

नमो नमो जगत्साक्षिण् नमो नमो निरन्जन॥

नमोस्तुते शूलपाणे नमोस्तु वृषभध्वज।

जीमूतवाहन करे सर्व त्र्यंबक शंकर॥

namo namo śambho namo namo jagatpate ।
namo namo jagatsākṣiṇ namo namo niranjana ।।
namostute śūlapāṇe namostu vṛṣabhadhvaja ।
jīmūtavāhana kare sarva tryaṁbaka śaṁkara ।।

महेश्वर हरेशान सुवनाक्ष वृषाकपे।

दक्ष यज्ञ क्षयकर काल रुद्र नमोऽस्तुते॥

maheśvara hareśāna suvanākṣa vṛṣākape ।
dakṣa yajña kṣayakara kāla rudra namo'stute ।।

त्वमादिरस्यजगत् त्वं मध्यं परमेश्वर।

भवानंतश्च भगवन् सर्वगस्त्वयं नमोस्तुते॥

tvamādirasyajagat tvaṁ madhyaṁ parameśvara ।
bhavānaṁtaśca bhagavan sarvagastvayaṁ namostute ।।

पूर्वे शर्वाय कीर्तिमूर्तये नमः।

ईशान्यां भवाय जलमूर्तये नमः।

उत्तरे रुद्राय अग्निमूर्तये नमः।

वायुव्यां उग्राय वायुमूर्तये नमः।

पश्चिमे भीमाय आकाशमूर्तये नमः।

नैरृत्यां पशुपतये यजमान मर्दये नमः।

दक्षिणे महादेवाय सोममूर्तये नमः।

आग्नेयां ईशानाय सूर्यमूर्तये नमः॥

pūrve śarvāya kīrtimūrtaye namaḥ ।
īśānyāṁ bhavāya jalamūrtaye namaḥ ।
uttare rudrāya agnimūrtaye namaḥ ।
vāyuvyāṁ ugrāya vāyumūrtaye namaḥ ।
paścime bhīmāya ākāśamūrtaye namaḥ ।
nairṛtyāṁ paśupataye yajamāna mardaye namaḥ।
dakṣiṇe mahādevāya somamūrtaye namaḥ

|
āgneyāṁ īśānāya sūryamūrtaye namaḥ ||

ॐ नमः शिवाय। नमस्कारान् समर्पयामि॥

om namaḥ śivāya | namaskārān samarpayāmi ||

राजोपचार

rājopacāra

गृहाण परमेशान सरत्ने छत्र चामरे।

दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः॥

gṛhāṇa parameśāna saratne chatra cāmare |
darpaṇaṁ vyañjanaṁ caiva rājabhogāya yatnathaḥ ||

ॐ चन्द्रशेखराय नमः। छत्रं समर्पयामि।

ॐ व्योमकेशाय नमः। चामरं समर्पयामि।

ॐ विश्वात्मने नमः। गीतं समर्पयामि।

ॐ सोममूर्तये नमः। नृत्यं समर्पयामि।

ॐ विश्वमूर्तये नमः। वाद्यं समर्पयामि।

ॐ गंभीरनादाय नमः। दर्पणं समर्पयामि।

ॐ मृगपाणये नमः। व्यञ्जनं समर्पयामि।

ॐ भुजंगनाथाय नमः। आन्दोलनं समर्पयामि।

ॐ त्रिकालाग्निनेत्राय नमः। राजोपचारान् समर्पयामि।

ॐ सर्वव्यापिने नमः। सर्वोपचारान् समर्पयामि।

om candraśekharāya namaḥ | chatraṁ samarpayāmi |
om vyomakeśāya namaḥ | cāmaraṁ samarpayāmi |
om viśvātmane namaḥ | gītaṁ samarpayāmi |
om somamūrtaye namaḥ | nṛtyaṁ samarpayāmi |
om viśvamūrtaye namaḥ | vādyaṁ samarpayāmi |
om gaṁbhīranādāya namaḥ | darpaṇaṁ samarpayāmi |
om mṛgapāṇaye namaḥ | vyañjanaṁ samarpayāmi |
om bhujaṁganāthāya namaḥ | āndolanaṁ samarpayāmi |
om trikālāgninetrāya namaḥ | rājopacārān samarpayāmi |
om sarvavyāpine namaḥ | sarvopacārān samarpayāmi |

मंत्र पुष्प

maṁtra puṣpa

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥

yajñena yajñamayajanta devāḥ tāni dharmāṇi prathamānyāsan |
te ha nākaṁ mahimānaḥ sacante yatra pūrve sādhyāḥ santi devāḥ ||

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।

सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्॥

yaḥ śuciḥ prayato bhūtvā juhuyādājyamanvaham |
sūktaṁ pañcadaśarcaṁ ca śrīkāmaḥ satataṁ japet ||

विद्या बुद्धि धनैश्वर्य पुत्र पौत्रादि संपदः।

पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम्॥

vidyā buddhi dhanaiśvarya putra pautrādi saṁpadaḥ |
puṣpāṁjali pradānena dehime īpsitaṁ varam ||

नमोऽस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः॥

namo'stvanaṁtāya sahasra mūrtaye sahasra pādākṣi śiroru bāhave |
sahasranāmne puruṣāya śāśvate sahasra koṭī yugadhāriṇe namaḥ ||

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नमो

आसीनेभ्यः।

यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव॥

ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां व्रशन्वान्।

शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः॥

ॐ कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः।

उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः॥

om namo mahadbhyo namo arbhakebhyo
namo yuvabhyo namo āsīnebhyaḥ |
yajāṁ devānya diśakravā mamā jāyasaḥ
śaṁ samāvṛkṣideva ||
om mamattunaḥ parijñāvasaraḥ mamattu
vāto apāṁ vraśanvān |
śiśītamindrā parvatā yuvannasthanno
viśvevarivasyantu devāḥ ||
om kathāta agne śucīyaṁta
ayordadāśurvāje bhirāśuśānaḥ |
ubheyattoketanaye dadhānā ṛtasya
sāmanṛṇayaṁta devāḥ ||

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय

कूर्महे समे कामान् काम कामाय मह्यं कामेश्वरो

वैश्रवणो दधातु कुबेराय वैश्रवणाय महाराजाय नमः॥

om rājādhi rājāya prasahya sāhine namo
vayaṁ vaiśravaṇāya
kūrmahe same kāmān kāma kāmāya
mahyaṁ kāmeśvaro
vaiśravaṇo dadhātu kuberāya vaiśravaṇāya
mahārājāya namaḥ ||

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं

पारमेष्ठां राज्यं महाराज्यमाधिपत्यमयं समंत

पर्यायिस्यात् सार्व भ्ॐअः सार्वायुशः अंतादा

परार्धात् पृथिव्यै समुद्र पर्यन्ताय एकरालिति तदप्येश

श्लोकोभिगीतो मरूतः परिवेष्टारो मरुतस्या वसन्गृहे

आवीक्षितस्य कामप्रेर्विश्वेदेवा सभासद इति॥

om svasti sāmrājyaṁ bhojyaṁ svārājyaṁ
vairājyaṁ
pārameṣṭhāṁ rājyaṁ
mahārājyamādhipatyamayaṁ samaṁta
paryāyisyāt sārva bhomaḥ sārvāyuśaḥ
aṁtādā
parārdhāt pṛthivyai samudra paryantāya
ekarāliti tadapyeśa
ślokobhigīto marūtaḥ pariveṣṭāro
marutasyā vasangṛhe
āvīkṣitasya kāmaprerviśvedevā sabhāsada
iti ||

श्री साम्बसदाशिवाय नमः। मंत्रपुष्पं समर्पयामि॥

śrī sāmbasadāśivāya namaḥ |
maṁtrapuṣpaṁ samarpayāmi ||

क्षमापनं

kṣamāpanaṁ

यत्किंचित् कुर्महे देव सद सुकृत्दुष्कृतम्।

तन्मे शिवपादस्य भुंक्षवक्षपय शंकर॥

yatkiṁcit kurmahe deva sada
sukṛtduṣkṛtam |
tanme śivapādasya bhuṁkṣavakṣapaya
śaṁkara ||

करचरणकृतं वा कायजं कर्मजं वा।

श्रवण नयनजं वा मानसं वापराधम्॥

विहितमवहितं वा सर्वमेतत् क्षमस्व।

जय जय करुणाब्धे श्री महादेव शम्भो॥

karacaraṇakṛtaṁ vā kāyajaṁ karmajaṁ vā
|
śravaṇa nayanajaṁ vā mānasaṁ
vāparādham ||
vihitamavahitaṁ vā sarvametat kṣamasva |
jaya jaya karuṇābdhe śrī mahādeva śambho
||

प्रार्थना

prārthanā

नमोव्यक्ताय सूक्ष्माय नमस्ते त्रिपुरान्तक।

पूजां गृहाण देवेश यथाशक्त्युपपादिताम्॥

किं न जानासि देवेश त्वयी भक्तिं प्रयश्च मे।

स्वपादाग्रतले देव दास्यं देहि जगत्पते॥

namovyaktāya sūkṣmāya namaste tripurāntaka ।
pūjāṁ gṛhāṇa deveśa yathāśaktyupapāditām ।।
kiṁ na jānāsi deveśa tvayī bhaktiṁ prayaśca me ।
svapādāgratale deva dāsyaṁ dehi jagatpate ।।

बद्धोहं विविद्धै पाशै संसारुभयबंधनै।

पतितं मोहजाले मं त्वं समुध्धर शंकर॥

प्रसन्नो भव मे श्रीमन् सद्गतिः प्रतिपाद्यताम्।

त्वदालोकन मात्रेण पवित्रोस्मि न संशयः॥

baddhohaṁ vividdhai pāśai saṁsārubhayabaṁdhanai ।
patitaṁ mohajāle maṁ tvaṁ samudhdhara śaṁkara ।।
prasanno bhava me śrīman sadgatiḥ pratipādyatām ।
tvadālokana mātreṇa pavitrosmi na saṁśayaḥ ।।

त्वदन्य शरण्यः प्रपन्नस्य नेति।

प्रसीद स्मरन्नेव हन्न्यास्तु दैन्यम्॥

नचेत्ते भवेद्भक्ति वात्सल्य हानि।

स्ततो मे दयालो दयां सन्निदेहि॥

tvadanya śaraṇyaḥ prapannsya neti ।
prasīda smaranneva hannyāstu dainyam ।।
nacette bhavedbhakti vātsalya hāni ।
stato me dayālo dayāṁ sannidehi ।।

सकारणमशेषस्य जगतः सर्वदा शिवः।

गो ब्राह्मण नृपाणां च शिवं भवतु मे सदा॥

sakāraṇamaśeṣasya jagataḥ sarvadā śivaḥ ।
go brāhmaṇa nṛpāṇāṁ ca śivaṁ bhavatu me sadā ।।

शङ्ख ब्रामण

śaṅkha brāmaṇa

(make three rounds of sha.nkha with water like aarati and pour down; chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे।

इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत॥

imāṁ āpaśivatama imaṁ sarvasya bheṣaje ।
imāṁ rāṣṭrasya vardhini imāṁ rāṣṭra bhratomata ।।

तीर्थ प्राश्न

tīrtha prāśna

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।

येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः॥

lābhasteṣāṁ jayasteṣāṁ kutasteṣāṁ parājayaḥ ।
yeṣāṁ indīvara śyāmo hṛdayasto janārdanaḥ ।।

अकाल मृत्यु हरणं सर्व व्याधि निवारणं।

सर्व पाप उपशमनं शिव पादोदकं शुभम्॥

akāla mṛtyu haraṇaṁ sarva vyādhi nivāraṇaṁ ।
sarva pāpa upaśamanaṁ śiva pādodakaṁ śubham ।।

विसर्जन पूजा

visarjana pūjā

आराधितानां देवतानां पुनः पूजां करिष्ये॥

ॐ नमः शिवाय॥

ārādhitānāṁ devatānāṁ punaḥ pūjāṁ kariṣye ।।
om namaḥ śivāya ।।

पूजांते छत्रं समर्पयामि। चामरं समर्पयामि।

नृत्यं समर्पयामि। गीतं समर्पयामि।

वाद्यं समर्पयामि। आंदोलिक आरोहणं समर्पयामि।

अश्वारोहणम् समर्पयामि। गजारोहणं समर्पयामि।

pūjāṁte chatraṁ samarpayāmi । cāmaraṁ samarpayāmi ।
nṛtyaṁ samarpayāmi । gītaṁ samarpayāmi ।
vādyaṁ samarpayāmi । āṁdolika ārohaṇaṁ samarpayāmi ।
aśvārohaṇam samarpayāmi । gajārohaṇaṁ samarpayāmi ।

श्री साम्बसदाशिवाय नमः।

śrī sāmbasadāśivāya namaḥ ।

समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार

पूजां समर्पयामि॥

samasta rājopacāra devopacāra śaktyupacāra bhaktyupacāra
pūjāṁ samarpayāmi ।।

आत्म समर्पण

ātma samarpaṇa

नित्यं नैमित्तिकं काम्यं यत्कृतं तु मया शिव।

तत् सर्वं परमेशान मया तुभ्यं समर्पितम्॥

nityaṁ naimittikaṁ kāmyaṁ yatkṛtaṁ tu mayā śiva ।
tat sarvaṁ parameśāna mayā tubhyaṁ samarpitam ।।

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।

यत्पूजितं मयादेव परिपूर्णं तदस्तु मे॥

maṁtrahīnaṁ kriyāhīnaṁ bhaktihīnaṁ janārdana ।
yatpūjitaṁ mayādeva paripūrṇaṁ tadastu me ।।

आवाहनं न जानामि न जानामि विसर्जनम्।

पूजाविधिं न जानामि क्षमस्व पुरुषोत्तम॥

āvāhanaṁ na jānāmi na jānāmi visarjanam ।
pūjāvidhiṁ na jānāmi kṣamasva puruṣottama ।।

अपराध सहस्राणि क्रियन्ते अहर्निशं मया।

तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम॥

aparādha sahasrāṇi kriyante aharniśaṁ mayā ।
tāni sarvāṇi me deva kṣamasva puruṣottama ।।

वर्तमाने बहुदान्य नाम संवत्सरे माग मासे कृश्ण पक्षे

त्रयोदसि तिथौ श्री साम्बसदाशिव प्रेरणया श्री

साम्बसदाशिव प्रीत्यर्थं अनेन मया चरित शिवरात्रि

व्रते श्री सदाशिव पूजाराधनेन

भगवान् श्री शंकरः प्रीयतां॥

vartamāne bahudānya nāma saṁvatsare māga māse kṛśṇa pakṣe
trayodasi tithau śrī sāmbasadāśiva preraṇayā śrī
sāmbasadāśiva prītyarthaṁ anena mayā carita śivarātri
vrate śrī sadāśiva pūjārādhanena
bhagavān śrī śaṁkaraḥ prīyatāṁ ।।

ॐ तत्सत्

om tatsat

॥ श्री सदाशिवार्पणमस्तु॥

।। śrī sadāśivārpaṇamastu ।।

अर्घ्यप्रदानं

arghyapradānaṁ

श्री साम्बसदाशिव प्रेरणया श्री साम्बसदाशिव प्रीत्यर्थं

शिवरात्रि व्रत सम्पूर्ण फल प्राप्यर्थं च अर्घ्यं प्रदानं करिष्ये।

śrī sāmbasadāśiva preraṇayā śrī sāmbasadāśiva prītyarthaṁ śivarātri vrata sampūrṇa phala prāpyarthaṁ ca arghya pradānaṁ kariṣye।

व्योमकेश नमस्तुभ्यं व्योमात्मा व्योमरूपिणे।

नक्षत्ररुपिणे तुभ्यं ददाम्यर्घ्यं नमोऽस्तुते।

श्री शिवाय नमः।

तारकलिंगाय इदमर्घ्यं दत्तं न मम॥

vyomakeśa namastubhyaṁ vyomātmā vyomarūpiṇe ।
nakṣatrarupiṇe tubhyaṁ dadāmyarghyaṁ namo'stute ।
śrī śivāya namaḥ ।
tārakaliṁgāya idamarghyaṁ dattaṁ na mama ।।

कैलाश निलय शम्भो पार्वती प्रिय वल्लभ।

त्रैलोक्यतमविध्वंसिन् गृहाणर्घ्यं सदाशिव॥

श्री शिवाय नमः।

सदाशिवाय इदमर्घ्यं दत्तं न मम॥

kailāśa nilaya śambho pārvatī priya vallabha ।
trailokyatamavidhvaṁsin gṛhāṇarghyaṁ sadāśiva ।।
śrī śivāya namaḥ ।
sadāśivāya idamarghyaṁ dattaṁ na mama ।।

कालरुद्र शिव शम्भो कालात्मन् त्रिपुरांतक।

दुरितघ्न सुरश्रेष्ठ गृहाणर्घ्यं सदाशिव॥

श्री शिवाय नमः।

सदाशिवाय इदमर्घ्यं दत्तं न मम॥

kālarudra śiva śambho kālātman tripurāṁtaka ।
duritagna suraśreṣṭha gṛhāṇarghyaṁ sadāśiva ।।
śrī śivāya namaḥ ।
sadāśivāya idamarghyaṁ dattaṁ na mama ।।

आकाशाद्याशरीराणि गृहनक्षत्रमालैनि।

सर्व सिद्धि निवासार्तं ददामर्घ्यं सदाशिव॥

श्री शिवाय नमः।

सदाशिवाय इदमर्घ्यं दत्तं न मम॥

ākāśādyāśarīrāṇi gṛhanakṣatramālaini ।
sarva siddhi nivāsārtaṁ dadāmarghyaṁ sadāśiva ।।
śrī śivāya namaḥ ।
sadāśivāya idamarghyaṁ dattaṁ na mama ।।

उमादेवी शिवार्धाङ्गी जगन्मातृ गुणात्मिके।

त्राहि मां देवि सर्वेषि गृहाणार्घ्यं नमोऽस्तुते॥

श्री पार्वत्यै नमः।

पार्वत्यै इदमर्घ्यं दत्तं न मम॥

umādevī śivārdhāṅgī jaganmātṛ guṇātmike ।
trāhi māṁ devi sarveṣi gṛhāṇārghyaṁ namo'stute ।।
śrī pārvatyai namaḥ ।
pārvatyai idamarghyaṁ dattaṁ na mama ।।

श्री गुणात्मन् त्रिलोकेशः ब्रह्मा विष्णु शिवात्मक।

अर्घ्यं चेदं मया दत्तं गृहाण गणनायक। ॥

श्री गणपतये नमः।

गणपतये इदमर्घ्यं दत्तं न मम॥

śrī guṇātman trilokeśaḥ brahmā viṣṇu śivātmaka ।
arghyaṁ cedaṁ mayā dattaṁ gṛhāṇa gaṇanāyaka। ।।
śrī gaṇapataye namaḥ ।
gaṇapataye idamarghyaṁ dattaṁ na mama ।।

सेनाधिप सुरश्रेष्ठ पार्वती प्रियनन्दन।

गृहाणर्घ्यं मया दत्तं नमस्ते शिखिवाहन।

श्री स्कन्दाय नमः।

स्कन्दाय इदमर्घ्यं दत्तं न मम॥

senādhipa suraśreṣṭha pārvatī priyanandana ।
gṛhāṇarghyaṁ mayā dattaṁ namaste śikhivāhana ।
śrī skandāya namaḥ ।
skandāya idamarghyaṁ dattaṁ na mama ।।

वीरभद्र महावीर विश्व ज्ञान वर प्रद।

इदमर्घ्यं प्रदास्यामि संग्रहाण शिवप्रिय॥

श्री वीरभद्राय नमः।

वीरभद्राय इदमर्घ्यं दत्तं न मम॥

vīrabhadra mahāvīra viśva jñāna vara prada ।
idamarghyaṁ pradāsyāmi saṁgrahāṇa śivapriya ।।
śrī vīrabhadrāya namaḥ ।
vīrabhadrāya idamarghyaṁ dattaṁ na mama ।।

धर्मस्त्वं वृष रूपेण जगदानन्दकारक।

अष्टमूर्तैरधिष्ठानं अथः पाहि सनातन।

श्री वृषभाय नमः।

वृषभाय इदमर्घ्यं दत्तं न मम॥

dharmastvaṁ vṛṣa rūpeṇa jagadānandakāraka ।
aṣṭamūrtairadhiṣṭhānaṁ athaḥ pāhi sanātana ।
śrī vṛṣabhāya namaḥ ।
vṛṣabhāya idamarghyaṁ dattaṁ na mama ।।

चण्डीश्वर महादेव त्राहि माम् कृपयाकार।

इदमर्घ्यं प्रदास्यामि प्रसन्ना वरदा भव।

श्री चण्डीश्वराय नमः।

चण्डीश्वराय इदमर्घ्यं दत्तं न मम॥

caṇḍīśvara mahādeva trāhi mām kṛpayākāra ।
idamarghyaṁ pradāsyāmi prasannā varadā bhava ।
śrī caṇḍīśvarāya namaḥ ।
caṇḍīśvarāya idamarghyaṁ dattaṁ na mama ।।

अनेन शिवरात्रि व्रतांगत्वेन अर्घ्यप्रदानेन भगवन्

श्री सदाशिव प्रीयतां।

ॐ तत्सत्

श्री सदाशिवार्पणमस्तु॥

anena śivarātri vratāṁgatvena arghyapradānena bhagavan
śrī sadāśiva prīyatāṁ ।
om tatsat
śrī sadāśivārpaṇamastu ।।

यान्तु देव गणाः सर्वे पूजां आदाय पर्तिवीम्

इष्ट काम्यार्थ सिध्यर्थं पुनरागमनाय च॥

yāntu deva gaṇāḥ sarve pūjāṁ ādāya partivīm
iṣṭa kāmyārtha sidhyarthaṁ punarāgamanāya ca ।।

# वेदसारशिवस्तोत्रम्॥

## vedasāraśivastotram ||

॥ श्रीः॥

॥ अथ वेदसारशिवस्तोत्रम्॥

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम्॥ १॥

|| śrīḥ||
|| atha vedasāraśivastotram||
paśūnāṁ patiṁ pāpanāśaṁ pareśaṁ
gajendrasya kṛttiṁ vasānaṁ vareṇyam |
jaṭājūṭamadhye sphuradgāṅgavāriṁ
mahādevamekaṁ smarāmi smarārim ||
1||

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम्।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम्॥ २॥

maheśaṁ sureśaṁ surārātināśaṁ
vibhuṁ viśvanāthaṁ
vibhūtyaṅgabhūṣam |
virūpākṣamindvarkavahnitrinetraṁ
sadānandamīḍe prabhuṁ pañcavaktram
|| 2||

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम्॥ ३॥

girīśaṁ gaṇeśaṁ gale nīlavarṇaṁ
gavendrādhirūḍhaṁ guṇātītarūpam |
bhavaṁ bhāsvaraṁ bhasmanā bhūṣitāṅgaṁ
bhavānīkalatraṁ bhaje pañcavaktram ||
3||

शिवाकान्त शंभो शशाङ्कार्धमौले
महेशान शूलिञ्जटाजूटधारिन्।
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप॥ ४॥

śivākānta śaṁbho śaśāṅkārdhamaule
maheśāna śūliñjaṭājūṭadhārin |
tvameko jagadvyāpako viśvarūpaḥ
prasīda prasīda prabho pūrṇarūpa ||
4||

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोंकारवेद्यम्।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम्॥ ५॥

parātmānamekaṁ jagadbījamādyaṁ
nirīhaṁ nirākāramoṁkāravedyam |
yato jāyate pālyate yena viśvaṁ
tamīśaṁ bhaje līyate yatra viśvam ||
5||

न भूमिर्नं चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा।
न चोष्णं न शीतं न देशो न वेषो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे॥ ६॥

na bhūmirnaṁ cāpo na vahnirna vāyu-
rna cākāśamāste na tandrā na nidrā |
na coṣṇaṁ na śītaṁ na deśo na veṣo
na yasyāsti mūrtistrimūrtiṁ tamīḍe ||
6||

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम्।
तुरीयं तमःपारमाद्यन्तहीनं

प्रपद्ये परं पावनं द्वैतहीनम्॥ ७॥

ajaṁ śāśvataṁ kāraṇaṁ kāraṇānāṁ
śivaṁ kevalaṁ bhāsakaṁ bhāsakānām ।
turīyaṁ tamaḥpāramādyantahīnaṁ
prapadye paraṁ pāvanaṁ dvaitahīnam
।। 7।।

नमस्ते नमस्ते विभो विश्वमूर्ते

नमस्ते नमस्ते चिदानन्दमूर्ते।

नमस्ते नमस्ते तपोयोगगम्य

नमस्ते नमस्ते श्रुतिज्ञानगम्य॥ ८॥

namaste namaste vibho viśvamūrte
namaste namaste cidānandamūrte ।
namaste namaste tapoyogagamya
namaste namaste śrutijñānagamya ।।
8।।

प्रभो शूलपाणे विभो विश्वनाथ

महादेव शंभो महेश त्रिनेत्र।

शिवाकान्त शान्त स्मरारे पुरारे

त्वदन्यो वरेण्यो न मान्यो न गण्यः॥ ९॥

prabho śūlapāṇe vibho viśvanātha
mahādeva śaṁbho maheśa trinetra ।
śivākānta śānta smarāre purāre
tvadanyo vareṇyo na mānyo na gaṇyaḥ
।। 9।।

शंभो महेश करुणामय शूलपाणे

गौरीपते पशुपते पशुपाशनाशिन्।

काशीपते करुणया जगदेतदेक-

स्त्वंहंसि पासि विदधासि महेश्वरोऽसि॥ १०॥

śaṁbho maheśa karuṇāmaya śūlapāṇe
gaurīpate paśupate paśupāśanāśin ।
kāśīpate karuṇayā jagadetadeka-
stvaṁhaṁsi pāsi vidadhāsi maheśvaro'si
।। 10।।

त्वत्तो जगद्भवति देव भव स्मरारे

त्वय्येव तिष्ठति जगन्मृड विश्वनाथ।

त्वय्येव गच्छति लयं जगदेतदीश

लिङ्गात्मके हर चराचरविश्वरूपिन्॥ ११॥

tvatto jagadbhavati deva bhava smarāre
tvayyeva tiṣṭhati jaganmṛḍa viśvanātha ।
tvayyeva gacchati layaṁ jagadetadīśa
liṅgātmake hara carācaraviśvarūpin ।।
11।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ

वेदसारशिवस्तोत्रं संपूर्णम्।

iti śrīmatparamahaṁsaparivrājakācāryasya
śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṁkarabhagavataḥ kṛtau
vedasāraśivastotraṁ saṁpūrṇam ।

# श्रीरुद्रत्रिशति॥

## śrīrudratriśati | |

ॐ श्री गुरुभ्यो नमः। हरिः ॐ।

॥ श्रिरुद्रनाम त्रिशति॥

नमो॑ हिर॑ण्यबाहवे॒ नम॑ः। सेना॒न्ये॑ नम॑ः।

दि॒शां च॒ पत॑ये॒ नम॑ः। नमो॑ वृ॒क्षेभ्यो॒ नम॑ः।

हरि॑केशेभ्यो॒ नम॑ः। प॒शू॒नां पत॑ये॒ नम॑ः।

नम॑ः स॒स्पिञ्ज॑राय॒ नम॑ः। त्विषी॑मते॒ नम॑ः।

प॒थी॒नां पत॑ये॒ नम॑ः। नमो॑ बभ्लु॒शाय॒ नम॑ः।

वि॒व्या॒धिने॒ नम॑ः। अन्ना॑ना॒ं पत॑ये नम॑ः।

नमो॒ हरि॑केशाय॒ नम॑ः। उ॒प॒वी॒तिने॒ नम॑ः।

पु॒ष्टाण॒ं पत॑ये नम॑ः। नमो॑ भ॒वस्य॑ हे॒त्यै नम॑ः।

जग॑ता॒ं पत॑ये॒ नम॑ः। नमो॑ रु॒द्राया॒ नम॑ः।

आ॒त॒ता॒विने॒ नम॑ः। क्षेत्रा॑णा॒ं पत॑ये॒ नम॑ः।

नम"ः सू॒ताय॒ नम॑ः। अह॑न्त्याय॒ नम॑ः।

वना॑ना॒ं पत॑ये॒ नम॑ः। नमो॒ रोहि॑ताय॒ नम॑ः।

स्थ॒पत॑ये नम॑ः। वृ॒क्षाण॒ं पत॑ये॒ नम॑ः।

नमो॑ म॒न्त्रिणे॒ नम॑ः। वा॒णि॒जाय॒ नम॑ः।

कक्षा॑ण॒ं पत॑ये नम॑ः। नमो॑ भुव॒ंतये॒ नम॑ः।

वा॒रि॒व॒स्कृ॒ताय॒ नम॑ः। ओष॑धीना॒ं पत॑ये॒ नम॑ः।

नम॑ उ॒च्चैर्घो॑षाय॒ नम॑ः। आ॒क्र॒न्दय॑ते नम॑ः।

प॒त्ती॒नाम् पत॑ये॒ नम॑ः। नम॑ः कृत्स्नवी॒ताय॒ नम॑ः।

om śrī gurubhyo namaḥ | hariḥ om |

| | śrirudranāma triśati | |

namo` hiraṇyabāhave` namaḥ | senā`nye namaḥ |

di`śāṁ ca` pataye` namaḥ | namo vṛ`kśebhyo` namaḥ |

harikeśebhyo` namaḥ | pa`śū`nāṁ pataye` namaḥ |

namaḥ sa`spiñjarāya` namaḥ | tviṣīmate` namaḥ |

pa`thī`nāṁ pataye` namaḥ | namo babhlu`śāya` namaḥ |

vi`vyā`dhine` namaḥ | annānā`ṁ pataye namaḥ |

namo` harikeśaya` namaḥ | u`pa`vī`tine` namaḥ |

pu`ṣṭāṇa`ṁ pataye namaḥ | namo bha`vasya he`tyai namaḥ |

jagatā`ṁ pataye` namaḥ | namo ru`drāyā` namaḥ |

ā`ta`tā`vine` namaḥ | kśetrāṇā`ṁ pataye` namaḥ |

nama"ḥ sū`tāya` namaḥ | ahantyāya` namaḥ |

vanānā`ṁ pataye` namaḥ | namo` rohitāya` namaḥ |

stha`pataye namaḥ । vṛ`kśāṇa`ṁ pataye` namaḥ ।
namo ma`ntriṇe` namaḥ । vā`ṇi`jāya` namaḥ ।
kakṣāṇa`ṁ pataye namaḥ । namo bhuva`ṁtaye` namaḥ ।
vā`ri`va`skṛ`tāya` namaḥ । oṣadhīnā`ṁ pataye` namaḥ ।
nama u`ccairghoṣāya` namaḥ ।
ā`kra`ndayate namaḥ ।
pa`ttī`nām pataye` namaḥ । namaḥ kṛtsnavī`tāya` namaḥ ।

धावते` नमः। सत्वना`ं पतये` नमः॥

dhāvate` namaḥ । satvanā`ṁ pataye` namaḥ । ।

नम`ः सहमाना`य नमः। नि`व्या`दिने` नमः।

आ`व्या`धिनीना`ं पतये` नमः। नमः ककु`भाय` नमः।

नि`ष`ङ्गिणे` नमः। स्ते`नाना`ं पतये` नमः।

नमो निष`ङ्गिणे` नमः। इ`षु`धि`मते` नमः।

तस्कराणा`ं पतये` नमः। नमो` वञ्चते` नमः।

प`रि`वञ्चते` नमः। स्ता`यू`नां` पतये` नमः।

नमो निचे`रवे` नमः। प`रि`च`राय` नमः।

अरण्याना`ं पतये` नमः। नमः सृका`विभ्यो` नमः।

जिघांसद्भ्यो` नमः। मु`ष्ण`तां पतये` नमः।

नमोऽसि`मद्भ्यो` नमः। नक्त`ंचरद्भ्यो` नमः।

प्र`कृ`न्ताना`ं पतये` नमः। नम उष्णी`षिने नमः।

गि`रि`च`राय नमः। कु`लु`ञ्चाना`ं पतये` नमः।

nama`ḥ sahamānā`ya namaḥ । ni`vyā`dine` namaḥ ।
ā`vyā`dhinīnā`ṁ pataye` namaḥ । namaḥ kaku`bhāya` namaḥ ।
ni`ṣa`ṅgiṇe` namaḥ । ste`nānā`ṁ pataye` namaḥ ।
namo niṣa`ṅgiṇe` namaḥ । i`ṣu`dhi`mate` namaḥ ।
taskarāṇā`ṁ pataye` namaḥ । namo` vañcate` namaḥ ।
pa`ri`vañcate` namaḥ । stā`yū`nāṁ` pataye` namaḥ ।
namo nice`rave` namaḥ । pa`ri`ca`rāya` namaḥ ।
araṇyānā`ṁ pataye` namaḥ । namaḥ sṛkā`vibhyo` namaḥ ।
jighāṁsadbhyo` namaḥ । mu`ṣṇa`tāṁ pataye` namaḥ ।
namo'si`madbhyo` namaḥ ।
nakta`ṁcaradbhyo` namaḥ ।
pra`kṛ`ntānā`ṁ pataye` namaḥ । nama uṣṇī`ṣine namaḥ ।
gi`ri`ca`rāya namaḥ । ku`lu`ñcānā`ṁ pataye` namaḥ ।

नम` इषुमद्भ्यो नमः। ध`न्वा`विभ्यश्च नमः। वो` नमः।

नम आतन्वा`नेभ्यो। प्र`ति`दधानेभ्यश्च नमः। वो` नमः।

नम आ`यच्छद्भ्यो` नमः। वि`सृ`जद्भ्यश्च` नमः। वो` नमः।

नमोऽस्यद्भ्यो` नमः। विध्यद्भ्यश्च` नमः। वो` नमः।

नम` आसीनेभ्यो` नमः। शयानेभ्यश्च` नमः। वो` नमः।

नमः स्व`पद्भ्यो` नमः। जाग्रद्भ्यश्च` नमः। वो` नमः।

नम`स्तिष्ठद्भ्यो` नमः। धावद्भ्यश्च` नमः। वो` नमः।

नमस्स`भाभ्यो` नमः। स`भापतिभ्यश्च नमः। वो` नमः।

नमो` अश्वेभ्यो` नमः। अश्वपतिभ्यश्च` नमः। वो` नमः।

nama` iṣumadbhyo namaḥ ।
dha`nvā`vibhyaśca namaḥ । vo` namaḥ ।
nama ātanvā`nebhyo ।
pra`ti`dadhānebhyaśca namaḥ । vo` namaḥ ।
nama ā`yacchadbhyo` namaḥ ।
vi`sṛ`jadbhyaśca` namaḥ । vo` namaḥ ।
namo'syadbhyo` namaḥ ।
vidhyadbhyaśca` namaḥ । vo` namaḥ ।
nama` āsīnebhyo` namaḥ । śayānebhyaśca` namaḥ । vo` namaḥ ।
namaḥ sva`padbhyo` namaḥ ।
jāgradbhyaśca` namaḥ । vo` namaḥ ।
nama`stiṣṭhadbhyo` namaḥ ।
dhāvadbhyaśca` namaḥ । vo` namaḥ ।
namassa`bhābhyo` namaḥ ।
sa`bhāpatibhyaśca namaḥ । vo` namaḥ ।
namo` aśvebhyo` namaḥ ।

aśvapatibhyaśca` namaḥ । vo` namaḥ ।

नम आव्य`धिनीभ्यो` नमः। वि`विध्यन्तीभ्यश्च` नमः।

वो` नमः। नम` उगणाभ्यो नमः। तृ`ꣳ`ह`तीभ्यश्च` नमः।

वो` नमः। नमो गृ`त्सेभ्यो नमः। गृ`त्सपतिभ्यश्च` नमः।

वो` नमः। नमो` व्रातेभ्यो` नमः। व्रातपतिभ्यश्च` नमः।

वो` नमः। नमो ग`णेभ्यो नमः। ग`णपतिभ्यश्च` नमः। वो`

नमः।

nama āvya`dhinībhyo` namaḥ ।
vi`vidhyantībhyaśca` namaḥ ।
vo` namaḥ । nama` ugaṇābhyo namaḥ ।
tṛ`m̐`ha`tībhyaśca` namaḥ ।
vo` namaḥ । namo gṛ`tsebhyo namaḥ ।
gṛ`tsapatibhyaśca` namaḥ ।
vo` namaḥ । namo` vrātebhyo` namaḥ ।
vrātapatibhyaśca` namaḥ ।
vo` namaḥ । namo ga`ṇebhyo namaḥ ।
ga`ṇapatibhyaśca` namaḥ । vo` namaḥ ।

नमो` विरूपेभ्यो` नमः। वि`श्वरुपेभ्यश्च नमः। वो` नमः।

नमो म`हद्भ्यो` नमः। क्षु`ल्ल`केभ्यश्च` नमः। वो` नमः।

नमो र`थिभ्यो नमः। अ`र`थेभ्यश्च` नमः। वो` नमः।

नमो` रथेभ्यो` नमः। रथपतिभ्यश्च` नमः। वो` नमः।

नम`स्सेनाभ्यो` नमः। से`न`निभ्यश्च` नमः। वो` नमः।

नमः क्ष`त्तृभ्यो` नमः। सं`ग्र`ही`तृभ्यश्च` नमः। वो` नमः।

नम`स्तक्षभ्यो` नमः। र`थ`का`रेभ्यश्च` नमः। वो` नमः।

नम`ः कुलालेभ्यो` नमः। क`र्मारेभ्यश्च` नमः। वो` नमः।

नमः पुं`जिष्टेभ्यो` नमः। नि`षा`देभ्यश्च` नमः। वो` नमः।

नम इषु`कृद्भ्यो` नमः। ध`न्व`कृद्भ्यश्च` नमः। वो` नमः।

नमो मृग`युभ्यो` नमः। श्व`निभ्यश्च` नमः। वो` नमः।

नम`ः श्वभ्यो` नमः। श्वपतिभ्यश्च` नमः। वो` नमः

namo` virūpebhyo` namaḥ ।
vi`śvarupebhyaśca namaḥ । vo` namaḥ ।
namo ma`hadbhyo` namaḥ ।
kśu`lla`kebhyaśca` namaḥ । vo` namaḥ ।
namo ra`thibhyo namaḥ । a`ra`thebhyaśca`
namaḥ । vo` namaḥ ।
namo` rathebhyo` namaḥ ।
rathapatibhyaśca` namaḥ । vo` namaḥ ।
nama`ssenābhyo` namaḥ । se`na`nibhyaśca`
namaḥ । vo` namaḥ ।
namaḥ kśa`ttṛbhyo` namaḥ ।
sam`gra`hī`tṛbhyaśca` namaḥ । vo` namaḥ
।
nama`stakśabhyo` namaḥ ।
ra`tha`kā`rebhyaśca` namaḥ । vo` namaḥ ।
nama`ḥ kulālebhyo` namaḥ ।
ka`rmārebhyaśca` namaḥ । vo` namaḥ ।
namaḥ pum`jiṣṭebhyo` namaḥ ।
ni`ṣā`debhyaśca` namaḥ । vo` namaḥ ।
nama iṣu`kṛdbhyo` namaḥ ।
dha`nva`kṛdbhyaśca` namaḥ । vo` namaḥ ।
namo mṛga`yubhyo` namaḥ ।
śva`nibhyaśca` namaḥ । vo` namaḥ ।
nama`ḥ śvabhyo` namaḥ । śvapatibhyaśca`
namaḥ । vo` namaḥ

नमो भ`वाय च` नमः। रु`द्राय च` नमः।

नमश्श`र्वाय च` नमः। प`शु`पतये च` नमः।

नमो` नीलग्रीवाय च` नमः। शि`ति`कण्ठाय च` नमः।

नमः कप`र्दिने च` नमः। व्युप्तकेशाय च` नमः।

नमस्सहस्रा`क्षाय च` नमः। श`तधन्वने च` नमः।

नमो गिरि`शाय च` नमः। शि`पि`वि`ष्टाय च` नमः।

नमो मी`ढुष्टमाय च` नमः। इषुमते च` नमः।

नमो ह्र`स्वाय च` नमः। वा`म`नाय च` नमः।

नमो बृह`ते च` नमः। वर्षीयसे च` नमः।

नमो वृ`द्धाय च` नमः। सं`वृध्वने च` नमः।

नमो` अग्रियाय च` नमः। प्र`थ`माय च` नमः।

नम आ`शवे च` नमः। अ`जि`राय च` नमः।

नम`ः शीघ्रियाय च` नमः। शीभ्याय च` नमः।

नम ऊ`र्म्याय च` नमः। अ`व`स्व`न्याय च` नमः।

नमः स्रोत`स्याय च` नमः। द्वीप्याय च` नमः।

namo bha`vāya ca` namaḥ । ru`drāya ca`
namaḥ ।

namaśśa`rvāya ca` namaḥ | pa`śu`pataye ca` namaḥ |
namo` nīlagrīvāya ca` namaḥ |
śi`ti`kaṇṭhāya ca` namaḥ |
namaḥ kapa`rdine ca` namaḥ |
vyuptakeśāya ca` namaḥ |
namassahasrā`kśāya ca` namaḥ |
śa`tadhanvane ca` namaḥ |
namo giri`śāya ca` namaḥ | śi`pi`vi`ṣṭāya ca` namaḥ |
namo mī`ḍhuṣṭamāya ca` namaḥ | iṣumate ca` namaḥ |
namo hra`svāya ca` namaḥ | vā`ma`nāya ca` namaḥ |
namo bṛha`te ca` namaḥ | varṣīyase ca` namaḥ |
namo vṛ`ddhāya ca` namaḥ |
saṁ`vṛdhvane ca` namaḥ |
namo` agriyāya ca` namaḥ | pra`tha`māya ca` namaḥ |
nama ā`śave ca` namaḥ | a`ji`rāya ca` namaḥ |
nama`ḥ śīghriyāya ca` namaḥ | śībhyāya ca` namaḥ |
nama ū`rmyāya ca` namaḥ |
a`va`sva`nyāya ca` namaḥ |
namaḥ strota`syāya ca` namaḥ | dvīpyāya ca` namaḥ |

नमो ज्ये`ष्ठाय च` नमः। क`नि`ष्ठाय च` नमः।

नमः पूर्व`जाय च` नमः। अ`पर`जाय च` नमः।

नमो मध्य`माय च` नमः। अ`प`ग`ल्भाय च` नमः।

नमो जघ`न्याय च` नमः। बुध्नियाय च` नमः।

नमः सो`भ्याय च` नमः। प्र`ति`स`र्याय च` नमः।

नमो` याम्याय च` नमः। क्षेम्याय च` नमः।

नम उर्व`र्याय च` नमः। खल्याय च` नमः।

नम`ः श्लोक्याय च` नमः। अ`व`सा`न्याय च` नमः।

नमो` वन्याय च` नमः। कक्ष्याय च` नमः।

नमः श्र`वाय च` नमः। प्र`ति`श्र`वाय च` नमः।

नम आ`शुषेणाय च` नमः। आ`शुरथाय च` नमः।

नम`ः शूराय च` नमः। अ`व`भि`न्द`ते च` नमः।

नमो व`र्मिणे च` नमः। व`रू`थिने च` नमः।

नमो बि`ल्मिने च` नमः। क`व`चिने च` नमः।

नमश्श्रु`ताय च` नमः। श्रु`त`से`नाय च` नमः।

namo jye`ṣṭhāya ca` namaḥ | ka`ni`ṣṭhāya ca` namaḥ |
namaḥ pūrva`jāya ca` namaḥ | a`para`jāya ca` namaḥ |
namo madhya`māya ca` namaḥ |
a`pa`ga`lbhāya ca` namaḥ |
namo jagha`nyāya ca` namaḥ | budhniyāya ca` namaḥ |
namaḥ so`bhyāya ca` namaḥ |
pra`ti`sa`ryāya ca` namaḥ |
namo` yāmyāya ca` namaḥ | kśemyāya ca` namaḥ |
nama urva`ryāya ca` namaḥ | khalyāya ca` namaḥ |
nama`ḥ ślokyāya ca` namaḥ |
a`va`sā`nyāya ca` namaḥ |
namo` vanyāya ca` namaḥ | kakśyāya ca` namaḥ |
namaḥ śra`vāya ca` namaḥ | pra`ti`śra`vāya ca` namaḥ |
nama ā`śuṣeṇāya ca` namaḥ | ā`śurathāya ca` namaḥ |
nama`ḥ śūrāya ca` namaḥ | a`va`bhi`nda`te ca` namaḥ |
namo va`rmiṇe ca` namaḥ | va`rū`thine ca` namaḥ |
namo bi`lmine ca` namaḥ | ka`va`cine ca` namaḥ |
namaśśru`tāya ca` namaḥ | śru`ta`se`nāya ca` namaḥ |

नमो दुन्दु`भ्याय च` नमः। आ`ह`न`न्याय च` नमः।

नमो धृ`ष्णवे च` नमः। प्र`मृ`शाय च` नमः।

नमो दू`ताय च` नमः। प्रहिताय च` नमः।

नमो निष`ङ्गिणे च` नमः। इ`षु`धि`मते च` नमः।

नमस्ती`क्ष्णेषवे च` नमः। आ`यु`धिने च` नमः।

नमः।स्वायु`धाय च` नमः। सु`धन्वने च` नमः।

नम॑ः स्रुत्या॑य च॒ नम॑ः। पथ्या॑य च॒ नम॑ः।
नम॑ः का॒ट्या॑य च॒ नम॑ः। नी॒प्या॑य च॒ नम॑ः।
नम॒स्सूद्या॑य च॒ नम॑ः। स॒र॒स्या॑य च॒ नम॑ः।
नमो॑ ना॒द्याय॑ च॒ नम॑ः। वै॒श॒न्ताय॑ च॒ नम॑ः।
नम॑ः कूप्या॑य च॒ नम॑ः। अ॒व॒ट्या॑य च॒ नम॑ः।
नमो॒ वर्ष्या॑य च॒ नम॑ः। अ॒व॒र्ष्याय॑ च॒ नम॑ः।
नमो॑ मे॒घ्या॑य च॒ नम॑ः। वि॒द्यु॒त्या॑य च॒ नम॑ः।
नम॑ ई॒ध्रिया॑य च॒ नम॑ः। आ॒त॒प्या॑य च॒ नम॑ः।
नमो॒ वात्या॑य च॒ नम॑ः। रेष्मि॑याय च॒ नम॑ः।
नमो॑ वास्त॒व्या॑य च॒ नम॑ः। वास्तु॒पाय॑ च॒ नम॑ः।

namo dundu`bhyāya ca` namaḥ ।
ā`ha`na`nyāya ca` namaḥ ।
namo dhṛ`ṣṇave ca` namaḥ । pra`mṛ`śāya ca` namaḥ ।
namo dū`tāya ca` namaḥ । prahitāya ca` namaḥ ।
namo niṣa`ṅgiṇe ca` namaḥ । i`ṣu`dhi`mate ca` namaḥ ।
namastī`kśṇeṣave ca` namaḥ । ā`yu`dhine ca` namaḥ ।
namaḥ ।svāyu`dhāya ca` namaḥ ।
su`dhanvane ca` namaḥ ।
nama`ḥ srutyāya ca` namaḥ । pathyāya ca` namaḥ ।
namaḥ kā`ṭyāya ca` namaḥ । nī`pyāya ca` namaḥ ।
nama`ssūdyāya ca` namaḥ । sa`ra`syāya ca` namaḥ ।
namo nā`dyāya ca` namaḥ । vai`śa`ntāya ca` namaḥ ।
nama`ḥ kūpyāya ca` namaḥ । a`va`ṭyāya ca` namaḥ ।
namo` varṣyāya ca` namaḥ । a`va`rṣyāya ca` namaḥ ।
namo me`ghyāya ca` namaḥ । vi`dyu`tyāya ca` namaḥ ।
nama ī`dhriyāya ca` namaḥ । ā`ta`pyāya ca` namaḥ ।
namo` vātyāya ca` namaḥ । reṣmiyāya ca` namaḥ ।
namo vāsta`vyāya ca` namaḥ । vāstu`pāya ca` namaḥ ।

नम॒स्सोमा॑य च॒ नम॑ः। रु॒द्राय॑ च॒ नम॑ः।
नम॑स्ता॒म्राय॑ च॒ नम॑ः। अ॒रु॒णाय॑ च॒ नम॑ः।
नम॑ः श॒ङ्गाय॑ च॒ नम॑ः। प॒शु॒पत॑ये च॒ नम॑ः।
नम॑ उ॒ग्राय॑ च॒ नम॑ः। भी॒माय॑ च॒ नम॑ः।
नमो॑ अग्रेव॒धाय॑ च॒ नम॑ः। दू॒रे॒व॒धाय॑ च॒ नम॑ः।
नमो॑ ह॒न्त्रे च॒ नम॑ः। हनी॑यसे च॒ नम॑ः।
नमो॑ वृ॒क्षेभ्यो॒ नम॑ः।हरि॑केशेभ्यो॒ नम॑ः।
नम॑स्ता॒राय॒ नम॑ः। नम॑श्श॒ंभवे॑ च॒ नम॑ः।
म॒यो॒भवे॑ च॒ नम॑ः। नम॑श्शंक॒राय॑ च॒ नम॑ः।
म॒य॒स्क॒राय॑ च॒ नम॑ः। नम॑ः शि॒वाय॑ च॒ नम॑ः।
शि॒वत॑राय च॒ नम॑ः। नम॒स्तीर्थ्या॑य च॒ नम॑ः।
कूल्या॑य च॒ नम॑ः। नम॑ः पा॒र्या॑य च॒ नम॑ः।
अ॒वा॒र्या॑य च॒ नम॑ः। नम॑ः प्र॒तर॑णाय च॒ नम॑ः।
उ॒त्तर॑णाय च॒ नम॑ः। नम॑ आता॒र्या॑य च॒ नम॑ः।
आ॒ला॒द्या॑य च॒ नम॑ः। नम॑ः शष्प्या॑य च॒ नम॑ः।
फेन्या॑य च॒ नम॑ः। नम॑ः सिक॒त्या॑य च॒ नम॑ः।
प्र॒वा॒ह्या॑य च॒ नम॑ः।

nama`ssomāya ca` namaḥ । ru`drāya ca` namaḥ ।
namastā`mrāya ca` namaḥ । a`ru`ṇāya ca` namaḥ ।
namaḥ śa`ṅgāya ca` namaḥ । pa`śu`pataye ca` namaḥ ।
nama u`grāya ca` namaḥ । bhī`māya ca` namaḥ ।
namo agreva`dhāya ca` namaḥ ।
dū`re`va`dhāya ca` namaḥ ।
namo ha`ntre ca` namaḥ । hanīyase ca` namaḥ ।
namo vṛ`kśebhyo` namaḥ arikeśebhyo` namaḥ ।
namastā`rāya` namaḥ । namaśśa`ṁbhave ca` namaḥ ।
ma`yo`bhave ca` namaḥ ।
namaśśaṁka`rāya ca` namaḥ ।

ma`ya`ska`rāya ca` namaḥ | namaḥ śi`vāya ca` namaḥ |
śi`vatarāya ca` namaḥ | nama`stīrthyāya ca` namaḥ |
kūlyāya ca` namaḥ | namaḥ pā`ryāya ca` namaḥ |
a`vā`ryāya ca` namaḥ | namaḥ pra`taraṇāya ca` namaḥ |
u`ttaraṇāya ca` namaḥ | nama ātā`ryāya ca` namaḥ |
ā`lā`dyāya ca` namaḥ | nama`ḥ śaṣpyāya ca` namaḥ |
phenyāya ca` namaḥ | namaḥ sika`tyāya ca` namaḥ |
pra`vā`hyāya ca` namaḥ |

नम इरि`ण्याय च` नमः। प्र`प`थ्याय च` नमः।

नमः किंशि`लाय च` नमः। क्षयणाय च` नमः।

नमः कप`र्दिने च` नमः। पु`ल`स्तये च` नमः।

नमो` गोष्ठ्याय च` नमः। गृह्याय च` नमः।

नम`स्तल्प्याय च` नमः। गेह्याय च` नमः।

नमः का`ट्याय च` नमः। ग`ह्वरे`ष्ठाय च` नमः।

नमो ह्रद`य्याय च` नमः। नि`वे`ष्प्याय च` नमः।

नमः पांस`व्याय च` नमः। र`ज`स्याय च` नमः।

नम`ः शुष्क्याय च` नमः। ह`रि`त्याय च` नमः।

नमो` लोप्याय च` नमः। उ`ल`प्याय च` नमः।

नम ऊ`र्व्याय च` नमः। सू`र्म्याय च` नमः।

नमः प`र्ण्याय च` नमः। प`र्ण`श`द्याय च` नमः।

नमोपगु`रमाणाय च` नमः। अ`भि`घ्न`ते च` नमः।

नम आक्खिद`ते च` नमः। प्र`क्`खि`द`ते च` नमः।

नमो वो` नमः। कि`रि`केभ्यो` नमः।दे`वाना`ं` हृदयेभ्यो` नमः।

नमो विक्षीण`केभ्यो` नमः। नमो विचिन्व`त्केभ्यो` नमः।

नम आनिर्ह`तेभ्यो` नमः। नम आमीव`त्केभ्यो` नमः।

nama iri`ṇyāya ca` namaḥ | pra`pa`thyāya ca` namaḥ |
namaḥ kiṁśi`lāya ca` namaḥ | kśayaṇāya ca` namaḥ |
namaḥ kapa`rdine ca` namaḥ | pu`la`staye ca` namaḥ |
namo` goṣṭhyāya ca` namaḥ | gṛhyāya ca` namaḥ |
nama`stalpyāya ca` namaḥ | gehyāya ca` namaḥ |
namaḥ kā`ṭyāya ca` namaḥ |
ga`hvare`ṣṭhāya ca` namaḥ |
namo hrada`yyāya ca` namaḥ |
ni`ve`ṣpyāya ca` namaḥ |
namaḥ pāṁsa`vyāya ca` namaḥ |
ra`ja`syāya ca` namaḥ |
nama`ḥ śuṣkyāya ca` namaḥ | ha`ri`tyāya ca` namaḥ |
namo` lopyāya ca` namaḥ | u`la`pyāya ca` namaḥ |
nama ū`rvyāya ca` namaḥ | sū`rmyāya ca` namaḥ |
namaḥ pa`rṇyāya ca` namaḥ |
pa`rṇa`śa`dyāya ca` namaḥ |
namopagu`ramāṇāya ca` namaḥ |
a`bhi`ghna`te ca` namaḥ |
nama ākkhida`te ca` namaḥ |
pra`k`khi`da`te ca` namaḥ |
namo vo` namaḥ | ki`ri`kebhyo` namaḥ |de`vānā`ṁ` hṛdayebhyo` namaḥ |
namo vikśīṇa`kebhyo` namaḥ | namo vicinva`tkebhyo` namaḥ |
nama ānirha`tebhyo` namaḥ | nama āmīva`tkebhyo` namaḥ |

The Sri Rudra trishati is used to perform archana of Sri Rudra (or Shiva). It is said that this is the only namavaLi form of addressing the Lord in all of the Vedas. The Sri Rudra Trishati uses the verses of the Sri Rudram in a different form. It is a part of the mahanyaasam as well. Students of Sri Rudram practice the trishati after mastering the Sri Rudram. The Trishati archana is also done during pradosha worship of Sri Shiva.

# शिवताण्डवस्तोत्रं रावणरचितम्॥

## śivatāṇḍavastotraṁ rāvaṇaracitam ||

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम्।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम्॥ १॥

जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी-
-विलोलवीचिवल्लरीविराजमानमूर्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्शणं मम॥ २॥

धराधरेन्द्रनंदिनीविलासबन्धुबन्धुर
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्शधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे(क्वचिचिदंबरे) मनो विनोदमेतु वस्तुनि॥ ३॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि॥ ४॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः।
भुजङ्गराजमालया निबद्धजाटजूटक
श्रियै चिराय जायतां चकोरबन्धुशेखरः॥ ५॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
-निपीतपञ्चसायकं नमन्निलिम्पनायकम्।
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदेशिरोजटालमस्तु नः ॥ ६॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
-प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम॥। ७॥

नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्-
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरंधरः॥ ८॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
-वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम्।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदांधकच्छिदं तमंतकच्छिदं भजे॥ ९॥

अखर्व(अगर्व)सर्वमङ्गलाकलाकदंबमञ्जरी
रसप्रवाहमाधुरी विजृंभणामधुव्रतम्।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे॥ १०॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-
-द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट्।
धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः॥ ११॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्-
-गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्शपक्शयोः।
तृष्णारविन्दचक्शुषोः प्रजामहीमहेन्द्रयोः
समप्रवृतिकः (समं प्रवर्तयन्मनः) कदा सदाशिवं भजे॥ १२॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन्।
विमुक्तलोललोचनो ललामभाललग्नकः
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम्॥ १३॥

इदम् हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसंततम्।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिंतनम्॥ १४॥
पूजावसानसमये दशवक्त्रगीतं
यः शंभुपूजनपरं पठति प्रदोषे।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखिं प्रददाति शंभुः॥ १५॥
॥ इति श्रीरावणविरचितं शिवताण्डवस्तोत्रं संपूर्णम्॥

jaṭāṭavīgalajjalapravāhapāvitasthale
gale'valambya lambitāṁ bhujaṅgatuṅgamālikām ।
ḍamaḍḍamaḍḍamaḍḍamanninādavaḍḍamarvayaṁ
cakāra caṇḍatāṇḍavaṁ tanotu naḥ śivaḥ śivam ।। 1।।
jaṭākaṭāhasaṁbhramabhramannilimpanirjharī-
-vilolavīcivallarīvirājamānamūrdhani ।
dhagaddhagaddhagajjvalallalāṭapaṭṭapāvake
kiśoracandraśekhare ratiḥ pratikśaṇaṁ mama ।। 2।।
dharādharendranaṁdinīvilāsabandhubandhura
sphuraddigantasantatipramodamānamānase ।
kṛpākaṭākśadhoraṇīniruddhadurdharāpadi
kvaciddigambare(kvaciccidaṁbare) mano
vinodametu vastuni ।। 3।।
jaṭābhujaṅgapiṅgalasphuratphaṇāmaṇiprabhā
kadambakuṅkumadravapraliptadigvadhūmukhe ।
madāndhasindhurasphurattvaguttarīyamedure
mano vinodamadbhutaṁ bibhartu bhūtabhartari ।। 4।।
sahasralocanaprabhṛtyaśeṣalekhaśekhara
prasūnadhūlidhoraṇī vidhūsarāṅghripīṭhabhūḥ ।
bhujaṅgarājamālayā nibaddhajāṭajūṭaka
śriyai cirāya jāyatāṁ cakorabandhuśekharaḥ ।। 5।।
lalāṭacatvarajvaladdhanañjayasphuliṅgabhā-
-nipītapañcasāyakaṁ namannilimpanāyakam ।
sudhāmayūkhalekhayā virājamānaśekharaṁ
mahākapālisampadeśirojaṭālamastu naḥ ।। 6।।
karālabhālapaṭṭikādhagaddhagaddhagajjvala-
ddhanañjayāhutīkṛtapracaṇḍapañcasāyake ।
dharādharendranandinīkucāgracitrapatraka-
-prakalpanaikaśilpini trilocane ratirmama ।।। 7।।
navīnameghamaṇḍalī niruddhadurdharasphurat-
kuhūniśīthinītamaḥ prabandhabaddhakandharaḥ ।
nilimpanirjharīdharastanotu kṛttisindhuraḥ
kalānidhānabandhuraḥ śriyaṁ
jagaddhuraṁdharaḥ ।। 8।।
praphullanīlapaṅkajaprapañcakālimaprabhā-
-valambikaṇṭhakandalīruciprabaddhakandharam ।
smaracchidaṁ puracchidaṁ bhavacchidaṁ
makhacchidaṁ
gajacchidāṁdhakacchidaṁ tamaṁtakacchidaṁ
bhaje ।। 9।।
akharva(agarva)sarvamaṅgalākalākadaṁbamañjarī
rasapravāhamādhurī vijṛṁbhaṇāmadhuvratam ।
smarāntakaṁ purāntakaṁ bhavāntakaṁ
makhāntakaṁ
gajāntakāndhakāntakaṁ tamantakāntakaṁ bhaje
।। 10।।
jayatvadabhravibhramabhramadbhujaṅgamaśvasa-
-dvinirgamatkramasphuratkarālabhālahavyavāṭ ।
dhimiddhimiddhimidhvananmṛdaṅgatuṅgamaṅgala
dhvanikramapravartita pracaṇḍatāṇḍavaḥ śivaḥ
।। 11।।
dṛṣadvicitratalpayorbhujaṅgamauktikasrajor-
-gariṣṭharatnaloṣṭhayoḥ suhṛdvipakśapakśayoḥ ।
tṛṣṇāravindacakśuṣoḥ prajāmahīmahendrayoḥ
samapravṛtikaḥ (samaṁ pravartayanmanaḥ) kadā
sadāśivaṁ bhaje ।। 12।।
kadā nilimpanirjharīnikuñjakoṭare vasan
vimuktadurmatiḥ sadā śiraḥ sthamañjaliṁ vahan ।
vimuktalolalocano lalāmabhālalagnakaḥ
śiveti maṁtramuccaran kadā sukhī bhavāmyaham
।। 13।।
idam hi nityamevamuktamuttamottamaṁ stavaṁ
paṭhansmaranbruvannaro viśuddhimetisaṁtatam ।
hare gurau subhaktimāśu yāti nānyathā gatiṁ
vimohanaṁ hi dehināṁ suśaṅkarasya ciṁtanam
।। 14।।
pūjāvasānasamaye daśavaktragītaṁ
yaḥ śaṁbhupūjanaparaṁ paṭhati pradoṣe ।
tasya sthirāṁ rathagajendraturaṅgayuktāṁ
lakśmīṁ sadaiva sumukhiṁ pradadāti śaṁbhuḥ
।। 15।।
।। iti śrīrāvaṇaviracitaṁ śivatāṇḍavastotraṁ
saṁpūrṇam ।

# उमामहेश्वरस्तोत्रम्॥ ॥

umāmaheśvarastotram || ||

श्री शङ्कराचार्य कृतम्।

नमः शिवाभ्यां नवयौवनाभ्याम्

परस्पराश्लिष्टवपुर्धराभ्याम्।

नागेन्द्रकन्यावृषकेतनाभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ १॥

नमः शिवाभ्यां सरसोत्सवाभ्याम्

नमस्कृताभीष्टवरप्रदाभ्याम्।

नारायणेनार्चितपादुकाभ्यां

नमो नमः शङ्करपार्वतीभ्याम्॥ २॥

नमः शिवाभ्यां वृषवाहनाभ्याम्

विरिञ्चिविष्ण्विन्द्रसुपूजिताभ्याम्।

विभूतिपाटीरविलेपनाभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ३॥

नमः शिवाभ्यां जगदीश्वराभ्याम्

जगत्पतिभ्यां जयविग्रहाभ्याम्।

जम्भारिमुख्यैरभिवन्दिताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ४॥

नमः शिवाभ्यां परमौषधाभ्याम्

पञ्चाक्शरी पञ्जररञ्जिताभ्याम्।

प्रपञ्चसृष्टिस्थिति संहृताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ५॥

नमः शिवाभ्यामतिसुन्दराभ्याम्

अत्यन्तमासक्तहृदम्बुजाभ्याम्।

अशेषलोकैकहितङ्कराभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ६॥

नमः शिवाभ्यां कलिनाशनाभ्याम्

कङ्कालकल्याणवपुर्धराभ्याम्।

कैलासशैलस्थितदेवताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ७॥

नमः शिवाभ्यामशुभापहाभ्याम्

अशेषलोकैकविशेषिताभ्याम्।

अकुण्ठिताभ्याम् स्मृतिसंभृताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ८॥

नमः शिवाभ्यां रथवाहनाभ्याम्

रवीन्दुवैश्वानरलोचनाभ्याम्।

राकाशशाङ्काभमुखाम्बुजाभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ९॥

नमः शिवाभ्यां जटिलन्धरभ्याम्

जरामृतिभ्यां च विवर्जिताभ्याम्।

जनार्दनाब्जोद्भवपूजिताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ १०॥

नमः शिवाभ्यां विषमेक्शणाभ्याम्

बिल्वच्छदामल्लिकदामभृद्भ्याम्।

शोभावती शान्तवतीश्वराभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ ११॥

नमः शिवाभ्यां पशुपालकाभ्याम्

जगत्रयीरक्शण बद्धहृद्भ्याम्।

समस्त देवासुरपूजिताभ्याम्

नमो नमः शङ्करपार्वतीभ्याम्॥ १२॥

स्तोत्रं त्रिसन्ध्यं शिवपार्वतीभ्याम्

भक्त्या पठेद्द्वादशकं नरो यः।

स सर्वसौभाग्य फलानि भुङ्क्ते

शतायुरान्ते शिवलोकमेति॥ १३॥

इति उमामहेश्वरस्तोत्रं सम्पूर्णम्॥

shrii sha~Nkaraachaarya kR^itam.h .
namaH shivaabhyaa.n navayauvanaabhyaam.h
parasparaashlishhTavapurdharaabhyaam.h .
naagendrakanyaavR^ishhaketanaabhyaam.h
namo namaH sha~Nkarapaarvatiibhyaam.h .. 1..
namaH shivaabhyaa.n sarasotsavaabhyaam.h
namaskR^itaabhiishhTavarapradaabhyaam.h .
naaraayaNenaarchitapaadukaabhyaaM
namo namaH sha~Nkarapaarvatiibhyaam.h .. 2..
namaH shivaabhyaa.n
vR^ishhavaahanaabhyaam.h
viri~nchivishhNvindrasupuujitaabhyaam.h .
vibhuutipaaTiiravilepanaabhyaam.h
namo namaH sha~Nkarapaarvatiibhyaam.h .. 3..
namaH shivaabhyaa.n jagadiishvaraabhyaam
jagatpatibhyaa.n jayavigrahaabhyaam.h .
jambhaarimukhyairabhivanditaabhyaam.h
namo namaH sha~Nkarapaarvatiibhyaam.h .. 4..
namaH shivaabhyaaM
paramaushhadhaabhyaam.h
pa~nchaaksharii pa~njarara~njitaabhyaam.h .
prapañcasṛṣṭisthiti saṁhṛtābhyām
namo namaḥ śaṅkarapārvatībhyām || 5||
namaḥ śivābhyāmatisundarābhyām
atyantamāsaktahṛdambujābhyām |
aśeṣalokaikahitaṅkarābhyām
namo namaḥ śaṅkarapārvatībhyām || 6||
namaḥ śivābhyāṁ kalināśanābhyām
kaṅkālakalyāṇavapurdharābhyām |
kailāsaśailasthitadevatābhyām
namo namaḥ śaṅkarapārvatībhyām || 7||
namaḥ śivābhyāmaśubhāpahābhyām
aśeṣalokaikaviśeṣitābhyām |
akuṇṭhitābhyām smṛtisaṁbhṛtābhyām
namo namaḥ śaṅkarapārvatībhyām || 8||
namaḥ śivābhyāṁ rathavāhanābhyām
ravīnduvaiśvānaralocanābhyām |
rākāśaśāṅkābhamukhāmbujābhyām
namo namaḥ śaṅkarapārvatībhyām || 9||
namaḥ śivābhyāṁ jaṭilandharabhyām
jarāmṛtibhyāṁ ca vivarjitābhyām |
janārdanābjodbhavapūjitābhyām
namo namaḥ śaṅkarapārvatībhyām ||
10||
namaḥ śivābhyāṁ viṣamekśaṇābhyām
bilvacchadāmallikadāmabhṛdbhyām |
śobhāvatī śāntavatīśvarābhyām
namo namaḥ śaṅkarapārvatībhyām ||
11||
namaḥ śivābhyāṁ paśupālakābhyām
jagatrayīrakśaṇa baddhahṛdbhyām |
samasta devāsurapūjitābhyām
namo namaḥ śaṅkarapārvatībhyām ||
12||
stotraṁ trisandhyaṁ śivapārvatībhyām
bhaktyā paṭheddvādaśakaṁ naro yaḥ |
sa sarvasaubhāgya phalāni bhuṅkte
śatāyurānte śivalokameti || 13||
iti umāmaheśvarastotraṁ sampūrṇam ||

## पुरुषसूक्त॥

## अथ पुरुषसूक्तम्॥

## puruṣasūkta ||
## atha puruṣasūktam ||

ॐ तच्छ`ं योरावृणीमहे। गा`तुं य`ज्ञाय। गा`तुं य`ज्ञपतये।

दैवी" स्व`स्तिरस्तु नः।

स्व`स्तिर्मानुषेभ्यः। ऊ`र्ध्वं जिगातु भेष`जम्। शन्नो अस्तु

द्वि`पदे"। शं चतुष्पदे।

ॐ शान्ति`ः शान्ति`ः शान्तिः।

om taccha`ṁ yorāvṛṇīmahe | gā`tuṁ ya`jñāya | gā`tuṁ ya`jñapataye | daivī" sva`stirastu naḥ |
sva`stirmānuṣebhyaḥ | ū`rdhvaṁ jigātu bheṣa`jam | śanno astu dvi`pade" | śaṁ catuṣpade |
om śānti`ḥ śānti`ḥ śāntiḥ |

हरिः ॐ।

ॐ स`हस्रशीर्षा` पुरुषः। स`ह`स्रा`क्षः स`हस्रपात्।

स भूमिं वि`श्वतो वृ`त्वा। अत्यतिष्ठद्दशाङ्गु`लम्। १

पुरुष ए`वेदं सर्वम्"। यद्भू`तं यच्च` भव्यम्"।

उ`तामृत`त्वस्येशानः। यदन्नेनाति`रोहति। २

ए`तावानस्य महि`मा। अतो` ज्यायांश्च` पूरुषः।

पादो"ऽस्य` विश्वा भू`तानि। त्रि`पादस्या`मृतं दि`वि। ३

त्रि`पादू`र्ध्व उदै`त्पुरुषः। पादो"ऽस्ये`हाऽऽभवा`त्पुनः।

ततो` विश्व`ङ्व्यक्रामत्। सा`श`ना`न`श`ने अ`भि। ४

तस्मा"द्वि`राडजायत। वि`राजो` अधि` पूरुषः।

स जा`तो अत्यरिच्यत। प`श्चाद्भूमि`मथो पु`रः। ५

यत्पुरुषेण ह`विषा"। दे`वा य`ज्ञमतन्वत।

व`स`न्तो अस्यासी`दाज्यम्"। ग्री`ष्म इ`ध्मः श`रद्ध`विः। ६

स`प्तास्यासन्परि`धयः। त्रिः स`प्त स`मिधः कृ`ताः।

दे`वा यद्य`ज्ञं तन्वा`नाः। अबध्न`न्पुरुषं प`शुम्। ७

तं य`ज्ञं ब`र्हिषि` प्रौक्षन्। पुरुषं जा`तमग्र`तः।

तेन दे`वा अयजन्त। सा`ध्या ऋषयश्च` ये। ८

तस्मा"द्य`ज्ञात्सर्व`हुतः। संभृतं पृषदा`ज्यम्।

प`शूंस्तांश्चक्रे वाय`व्यान्। आ`र`ण्यान्ग्रा`म्याश्च` ये। ९

तस्मा"द्य`ज्ञात्सर्व`हुतः। ऋच`ः सामानि जज्ञिरे।

hariḥ om |
om sa`hasraśīrṣā` puruṣaḥ | sa`ha`srā`kṣaḥ sa`hasrapāt |
sa bhūmiṁ vi`śvato vṛ`tvā |
atyatiṣṭhaddaśāṅgu`lam | 1
puruṣa e`vedaṁ sarvam" | yadbhū`taṁ yacca` bhavyam" |
u`tāmṛta`tvasyeśānaḥ | yadannenāti`rohati | 2
e`tāvānasya mahi`mā | ato` jyāyāṁśca` pūruṣaḥ |
pādo"'sya` viśvā bhū`tāni |
tri`pādasyā`mṛtaṁ di`vi | 3
tri`pādū`rdhva udai`tpuruṣaḥ |
pādo"'sye`hā"bhavā`tpunaḥ |
tato` viśva`ṅvyakrāmat | sā`śa`nā`na`śa`ne a`bhi | 4
tasmā"dvi`rāḍajāyata | vi`rājo` adhi` pūruṣaḥ |
sa jā`to atyaricyata | pa`ścādbhūmi`matho pu`raḥ | 5
yatpuruṣeṇa ha`viṣā" | de`vā ya`jñamatanvata |
va`sa`nto asyāsī`dājyam" | grī`ṣma i`dhmaḥ śa`raddha`viḥ | 6
sa`ptāsyāsanpari`dhayaḥ | triḥ sa`pta sa`midhaḥ kṛ`tāḥ |
de`vā yadya`jñaṁ tanvā`nāḥ |
abadhna`npuruṣaṁ pa`śum | 7
taṁ ya`jñaṁ ba`rhiṣi` praukṣan | puruṣaṁ jā`tamagra`taḥ |
tena de`vā ayajanta | sā`dhyā ṛṣayaśca` ye | 8
tasmā"dya`jñātsarva`hutaḥ | saṁbhṛtaṁ pṛṣadā`jyam |
pa`śūṁstāṁścakre vāya`vyān |
ā`ra`ṇyāngrā`myāśca` ye | 9

tasmā"dya`jñātsarva`hutaḥ | ṛca`ḥ sāmāni jajñire |

छन्दांसि जज्ञिरे` तस्मा"त्। यजु`स्तस्मादजायत। १०

तस्मा`दश्वा अजायन्त। ये के चोभ`यादतः।

गावो ह जज्ञिरे` तस्मा"त्। तस्मा"ज्जा`ता अजा`वयः। ११

यत्पुरुष`ं व्यदधुः। क`ति`धा व्यकल्पयन्।

मुख`ं किमस्य` कौ बा`हू। कावू`रू पादावुच्येते। १२

ब्रा`ह्म`णो"ऽस्य` मुखमासीत्। बा`हू राज`न्यः कृ`तः।

ऊ`रू तदस्य` यद्वैश्यः। प`द्भ्यां शू`द्रो अजायत। १३

च`न्द्रमा` मनसो जा`तः। चक्षो`ः सूर्यो अजायत।

मुखा`दिन्द्रश्चा`ग्निश्च। प्रा`णाद्वा`युरजायत। १४

नाभ्या आसीद`न्तरिक्षम्। शी`र्ष्णो द्यौः समवर्तत।

प`द्भ्यां भूमि`र्दिश`ः श्रोत्रा"त्। तथा लो`कां अकल्पयन्।

१५

वेदा`हमे`तं पुरुषं म`हान्तम्"। आ`दि`त्यवर्णं` तमसस्तु`

पा`रे।

सर्वाणि रू`पाणि वि`चित्य` धीरः। नामानि कृ`त्वाऽभि`वद`न्

यदास्ते"। १६

धा`ता पु`रस्ता`द्यमुदाज`हार। श`क्रः

प्रवि`द्वान्प्र`दिश`श्चतस्रः।

तमे`वं वि`द्वान`मृत इ`ह भवति। नान्यः पन्था` अयनाय

विद्यते। १७

य`ज्ञेन य`ज्ञमयजन्त दे`वाः। तानि` धर्माणि प्रथ`मान्यासन्।

ते ह` नाकं महि`मानः सचन्ते। यत्र` पूर्वे सा`ध्याः सन्ति

दे`वाः। १८

chandāṁsi jajñire` tasmā"t |
yaju`stasmādajāyata | 10
tasmā`daśvā ajāyanta | ye ke cobha`yādataḥ |
gāvo ha jajñire` tasmā"t | tasmā"jjā`tā ajā`vayaḥ | 11
yatpuruṣa`ṁ vyadadhuḥ | ka`ti`dhā vyakalpayan |
mukha`ṁ kimasya` kau bā`hū | kāvū`rū pādāvucyete | 12
brā`hma`ṇo"'sya` mukhamāsīt | bā`hū rāja`nyaḥ kṛ`taḥ |
ū`rū tadasya` yadvaiśyaḥ | pa`dbhyāṁ śū`dro ajāyata | 13
ca`ndramā` manaso jā`taḥ | cakṣo`ḥ sūryo ajāyata |
mukhā`dindraścā`gniśca |
prā`ṇādvā`yurajāyata | 14
nābhyā āsīda`ntarikṣam | śī`rṣṇo dyauḥ samavartata |
pa`dbhyāṁ bhūmi`rdiśa`ḥ śrotrā"t | tathā lo`kāṁ akalpayan | 15
vedā`hame`taṁ puruṣaṁ ma`hāntam" |
ā`di`tyavarṇaṁ` tamasastu` pā`re |
sarvāṇi rū`pāṇi vi`citya` dhīraḥ | nāmāni kṛ`tvā'bhi`vada`n yadāste" | 16
dhā`tā pu`rastā`dyamudāja`hāra | śa`kraḥ pravi`dvānpra`diśa`ścatasraḥ |
tame`vaṁ vi`dvāna`mṛta i`ha bhavati |
nānyaḥ panthā` ayanāya vidyate | 17
ya`jñena ya`jñamayajanta de`vāḥ | tāni` dharmāṇi pratha`mānyāsan |
te ha` nākaṁ mahi`mānaḥ sacante | yatra` pūrve sā`dhyāḥ santi de`vāḥ | 18

अ`द्भ्यः संभूतः पृथि`व्यै रसा"च्च। वि`श्वकर्मण`ः

समवर्त`ताधि।

तस्य` त्वष्टा वि`दधद्रू`पमेति। तत्पुरुषस्य`

विश्व`माजान`मग्रे"। १

वेदा`हमे`तं पुरुषं म`हान्तम्"। आ`दि`त्यवर्णं` तमस`ः

परस्तात्।

तमे`वं वि`द्वान`मृत इ`ह भवति। नान्यः पन्था

विद्य`तेऽयनाय। २

प्र`जापतिश्चरति` गर्भे अ`न्तः। अ`जायमानो बहु`धा

विजायते।

तस्य` धीरा`ः परिजानन्ति` योनिम्"। मरीचीनां

प`दमिच्छन्ति

वे`धसः। ३

यो दे`वेभ्य` आतपति। यो दे`वाना"ं पु`रोहितः।

पूर्वो` यो दे`वेभ्यो जा`तः। नमो रु`चाय` ब्राह्मये। ४

रुचं ब्रा`ह्मम् ज`नयन्तः। दे`वा अग्रे` तदब्रुवन्।

यस्त्वै`वं ब्रा"ह्म`णो वि`द्यात्। तस्य दे`वा अस`न् वशे"। ५

ह्रीश्च ते ल`क्ष्मीश्च` पत्न्यौ"। अ`हो`रा`त्रे पा`र्श्वे।

नक्षत्राणि रू`पम्। अ`श्विनौ` व्यात्तम्"। इ`ष्टम् मनिषाण।

अ`मुं मनिषाण। सर्वम् मनिषाण। ६

a`dbhyaḥ saṁbhūtaḥ pṛthi`vyai rasā"cca ।
vi`śvakarmaṇa`ḥ samavarta`tādhi ।
tasya` tvaṣṭā vi`dadhadrū`pameti ।
tatpuruṣasya` viśva`mājāna`magre" । 1
vedā`hame`taṁ puruṣaṁ ma`hāntam"।
ā`di`tyavarṇaṁ` tamasa`ḥ parastāt ।
tame`vaṁ vi`dvāna`mṛta i`ha bhavati ।
nānyaḥ panthā vidya`teya`nāya । 2
pra`jāpatiścarati` garbhe a`ntaḥ ।
a`jāyamāno bahu`dhā vijāyate ।
tasya` dhīrā`ḥ parijānanti` yonim"।
marīcīnāṁ pa`damicchanti
ve`dhasaḥ । 3
yo de`vebhya` ātapati । yo de`vānā"ṁ pu`rohitaḥ ।
pūrvo` yo de`vebhyo jā`taḥ । namo ru`cāya` brāhmaye । 4
rucaṁ brā`hmam ja`nayantaḥ । de`vā agre` tadabruvan ।
yastvai`vaṁ brā"hma`ṇo vi`dyāt । tasya de`vā asa`n vaśe"। 5
hrīśca te la`kṣmīśca` patnyau"। a`ho`rā`tre pā`rśve ।
nakṣatrāṇi rū`pam । a`śvinau` vyāttam"। i`ṣṭam maniṣāṇa ।
a`muṁ maniṣāṇa। sarvam maniṣāṇa । 6

ॐ तच्छ`ं योरावृणीमहे। गा`तुं य`ज्ञाय। गा`तुं यज्ञपतये।

दैवी"स्स्व`स्तिरस्तु नः।

स्व`स्तिर्मानुषेभ्यः। ऊ`र्ध्वं जिगातु भेष`जम्। शन्नो अस्तु

द्वि`पदे"। शं चतुष्पदे।

om taccha`ṁ yorāvṛṇīmahe । gā`tuṁ ya`jñāya। gā`tuṁ yajñapataye ।
daivī"ssva`stirastu naḥ ।
sva`stirmānuṣebhyaḥ । ū`rdhvaṁ jigātu bheṣa`jam । śanno astu dvi`pade"। śaṁ catuṣpade ।

ॐ शान्ति`ः शान्ति`ः शान्तिः।

om śānti`ḥ śānti`ḥ śāntiḥ ।

# नारायणसूक्तम्॥

# nārāyaṇasūktam | |

तैत्तिरीयारण्यकम् - ४ प्रपाठकः - १० अनुवाकः १३

taittirīyāraṇyakam - 4 prapāṭhakaḥ - 10 anuvākaḥ 13

ॐ स॒ह ना॑ववतु। स॒ह नौ॑ भुनक्तु। स॒ह वी॒र्यं॑ करवावहै।

ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑॥ ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑॥

om sa`ha nāvavatu | sa`ha nau bhunaktu | sa`ha vī`ryaṁ karavāvahai | te`ja`svinā`vadhītamastu` mā vidviṣā`vahai" | | om śānti`ḥ śānti`ḥ śāntiḥ | |

ॐ॥ स॒ह॒स्र॒शीर्॑षं दे॒व॒ं वि॒श्वाक्षं॑ वि॒श्वश॑म्भुवं।

विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ पर॒मं प॒दम्।

वि॒श्वत॒ः पर॑मान्नि॒त्य॒ं वि॒श्वं ना॑राय॒णꣳ ह॑रिम्।

विश्व॑मे॒वेदं पुरु॑ष॒स्तद्वि॒श्वमुप॑जीवति।

पति॒ं विश्व॑स्या॒त्मेश्व॑र॒ꣳ॒ शाश्व॑तꣳ शि॒वम॑च्युतम्।

ना॒राय॒णं म॑हाज्ञे॒य॒ं वि॒श्वात्मा॑नं प॒राय॑णम्।

ना॒राय॒णप॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः।

ना॒राय॒ण प॑रं ब्र॒ह्म॒ त॒त्वं ना॑राय॒णः प॑रः।

ना॒राय॒णप॑रो ध्या॒ता॒ ध्या॒नम् ना॑राय॒णः प॑रः।

यच्च॑ किं॒चिज्ज॑गत्स॒र्व॒ं दृ॒श्यते" श्रूय॒तेऽपि॑ वा॥

om | | sa`ha`sra`śīrṣaṁ de`va`ṁ vi`śvākśaṁ vi`śvaśambhuvaṁ |
viśvaṁ nā`rāyaṇaṁ de`va`ma`kśaraṁ para`maṁ pa`dam |
vi`śvata`ḥ paramānni`tya`ṁ vi`śvaṁ nārāya`ṇaꣳ harim |
viśvame`vedaṁ puruṣa`stadvi`śvamupajīvati |
pati`ṁ viśvasyā`tmeśvara`ꣳ` śāśvataꣳ śi`vamacyutam |
nā`rāya`ṇaṁ mahājñe`ya`ṁ vi`śvātmānaṁ pa`rāyaṇam |
nā`rāya`ṇaparo jyo`ti`rā`tmā nārāya`ṇaḥ paraḥ |
nā`rāya`ṇa paraṁ bra`hma` ta`tvaṁ nārāya`ṇaḥ paraḥ |
nā`rāya`ṇaparo dhyā`tā` dhyā`nam nārāya`ṇaḥ paraḥ |
yacca ki`ñcijjagatsa`rva`ṁ dṛ`śyate" śrūya`te'pi vā | |

अन्त॑र्ब॒हिश्च॑ तत्स॒र्व॒ं व्या॒प्य ना॑राय॒णः स्थि॑तः।

अन॑न्त॒मव्य॑यं क॒विꣳ स॑मु॒द्रेऽन्तं॑ वि॒श्वश॑म्भुवम्।

प॒द्म॒को॒श प्र॑तीका॒श॒ꣳ॒ हृ॒दयं॑ चाप्य॒धोमु॑खम्।

अधो॑ नि॒ष्ट्या वि॑तस्या॒न्ते॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति।

ज्वा॒ल॒मा॒लाकु॑लं भा॒ति॒ वि॒श्वस्या॑यत॒नं म॑हत्।

सन्त॑तꣳ शि॒लाभि॑स्तु॒लम्ब॑त्याकोश॒सन्नि॑भम्।

तस्यान्ते॑ सुषि॒रꣳ सू॒क्ष्मं तस्मि॑"न् स॒र्वं प्रति॑ष्ठितम्।

तस्य॒ मध्ये॑ म॒हान॑ग्निर्वि॒श्वार्चि॑र्वि॒श्वतो॑मुखः।

सोऽग्र॑भु॒ग्विभ॑जन्ति॒ष्ठ॒न्नाहा॑रमज॒रः क॒विः।

ति॒र्य॒गू॒र्ध्वम॑धश्शा॒यी॒ र॒श्मय॑स्तस्य॒ सन्त॑ता।

स॒न्ता॒पय॑ति स्वं दे॒हमापा॑दतल॒मस्त॑कः।

तस्य॒ मध्ये॒ वह्नि॑शिखा अ॒णीयो"र्ध्वा व्य॒वस्थि॑तः।

नी॒लतो॑यद॑मध्य॒स्था॒द्वि॒द्युल्ले॑खेव॒ भास्व॑रा।

नी॒वार॒शूक॑वत्त॒न्वी॒ पी॒ता भा॑स्वत्य॒णूप॑मा।

तस्या"ः शिखा॒या म॑ध्ये प॒रमा"त्मा व्य॒वस्थि॑तः।

स ब्रह्म॒ स शिव॒ः स हरि॒ः सेन्द्र॒ः सोऽक्ष॑रः पर॒मः स्व॒राट्॥

antarba`hiśca tatsa`rva`ṁ vyā`pya nārāya`ṇaḥ sthitaḥ |
ananta`mavyayaṁ ka`viꣳ samu`dre'ntaṁ vi`śvaśambhuvam |
pa`dma`ko`śa pratīkā`śa`ꣳ` hṛ`dayaṁ cāpya`dhomukham |
adho ni`ṣṭayā vitasyā`nte` nā`bhyāmupari` tiṣṭhati |
jvā`la`mā`lākulaṁ bhā`ti` vi`śvasyāyata`naṁ mahat |

santatam̐
śi`lābhiṣtu`lambatyākośa`sannibham |
tasyānte suṣi`ram̐ sū`kśmaṁ tasmi"n
sa`rvaṁ pratiṣṭhitam |
tasya` madhye
ma`hanagagnirvi`śvārcirvi`śvatomukhaḥ |
so'grabhu`gvibhajanti`ṣṭha`nnāahāramaja`r
aḥ ka`viḥ |
ti`rya`gū`rdhvamadhaśśā`yī`
ra`śmayastasya` santatā |
sa`ntā`payati svaṁ
de`hamāpādatala`mastakaḥ |
tasya` madye` vahniśikhā a`ṇīyo"rdhvā
vya`vasthitaḥ |
nī`latoyadamadhya`sthā`dvi`dyullekheva`
bhāsvarā |
nī`vāra`śūkavatta`nvī` pī`tā
bhāsvatya`ṇūpamā |
tasyā"ḥ śikhā`yā madhye pa`ramā"tmā
vya`vasthitaḥ |
sa brahma` sa śiva`ḥ sa hari`ḥ sendra`ḥ
so'kṣaraḥ para`maḥ sva`rāṭ | |

ऋ`तꣳ स`त्यं परं ब्र`ह्म` पु`रुषं कृष्ण`पिङ्गलम्।

ऊ`र्ध्वरेतं विरूपा`क्श`ं वि`श्वरूपाय` वै नमो` नमः।
ṛ`tam̐ sa`tyaṁ paraṁ bra`hma` pu`ruṣaṁ
kṛṣṇa`piṅgalam |
ū`rdhvaretaṁ virūpā`kśa`ṁ vi`śvarūpāya`
vai namo` namaḥ |

ॐ ना`रा`य`णाय वि`द्महे वासुदे`वाय धीमहि। तन्नो विष्णुः

प्रचो`दया"त्।
om nā`rā`ya`ṇāya vi`dmahe vāsude`vāya
dhīmahi | tanno viṣṇuḥ praco`dayā"t |

## श्री सूक्त॥

## śrī sūkta | |

तां म॑ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॑म्।

यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम्॥ २॥

tāṁ ma॑ āva॑ha॒ jāta॑vedo
la॒kṣmīmana॑pagā॒minī॑m |
yasyāṁ॒ hira॑ṇyaṁ vi॒ndeyaṁ॒ gāmaśvaṁ॒
puru॑ṣāna॒ham | | 2 | |

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑दप्र॒मोदि॑नीम्।

श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वी जु॑षताम्॥ ३॥

a॒śva॒pū॒rvāṁ ra॑thama॒dhyāṁ
ha॒stinā॑dapra॒modi॑nīm |
śriya॑ṁ de॒vīmupa॑hvaye॒ śrīrmā de॒vī
ju॑ṣatām | | 3 | |

कां॒सो॒स्मि॒ तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां

त॒र्पय॑न्तीम्।

प॒द्मे॒स्थि॒तां प॒द्मव॑र्णां॒ तामि॒होप॑ह्वये॒ श्रियम्॥ ४॥

kāṁ॒so॒smi॒ tāṁ hira॑ṇyaprā॒kārā॑mā॒rdrāṁ
jvala॑ntīṁ tṛ॒ptāṁ ta॒rpaya॑ntīm |
pa॒dme॒sthi॒tāṁ pa॒dmava॑rṇāṁ॒
tāmi॒hopa॑hvaye॒ śriyam | | 4 | |

च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के

दे॒वजु॑ष्टामुदा॒राम्।

तां प॒द्मिनी॑मीं॒ शर॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृ॑णे॥

५॥

ca॒ndrāṁ prabhā॒sāṁ ya॒śasā॒ jvala॑ntīṁ॒
śriya॑ṁ lo॒ke de॒vaju॑ṣṭāmudā॒rām |
tāṁ pa॒dmini॑mīṁ॒ śara॑ṇama॒haṁ
prapa॑dye'la॒kṣmīrme naśyatāṁ॒ tvāṁ vṛ॑ṇe
| | 5 | |

आ॒दि॒त्यव॑र्णे तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ

बि॒ल्वः।

तस्य॒ फला॑नि॒ तप॒सानु॑दन्तुमा॒या॑न्तरा॒याश्च॑ बा॒ह्या

अल॒क्ष्मीः॥ ६॥

ā॒di॒tyava॑rṇe tapa॒so'dhi॑jā॒to
vana॒spati॒stava vṛ॒kṣo'tha bi॒lvaḥ |
tasya॒ phalā॑ni॒
tapa॒sānu॑dantumā॒yā॑ntarā॒yāśca॑ bā॒hyā
ala॒kṣmīḥ | | 6 | |

उपै॑तु॒ मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह।

प्रा॒दु॒र्भू॒तोऽस्मि॑ रा॒ष्ट्रे॒ऽस्मिन्की॒र्तिमृ॑द्धिं द॒दातु॑ मे॥ ७॥

upai॑tu॒ māṁ de॑vasa॒khaḥ kī॒rtiśca॒ maṇi॑nā
sa॒ha |
prā॒du॒rbhū॒to'smi॑
rāṣṭre॒'sminkī॒rtimṛ॑ddhiṁ da॒dātu॑ me | | 7
| |

क्षु॒त्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॑ल॒क्ष्मीं नाशया॒म्यहम्।

अभू॑ति॒मस॑मृद्धिं॒ च सर्वां॒ निर्णु॑दमे॒ गृहा॑त्॥ ८॥

kṣutpi॑pā॒sāma॑lāṁ jye॒ṣṭhāma॑la॒kṣmīṁ
nāśayā॒myaham |
abhūti॒masa॑mṛddhiṁ॒ ca sarvāṁ॒
nirṇu॑dame॒ gṛhā॑t | | 8 | |

ग॒न्धद्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी॑म्।

ई॒श्वरीं॑ सर्व॑भूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम्॥ ९॥

gaṁ॒dhadvā॒rāṁ du॑rādha॒rṣāṁ॒
ni॒tyapu॑ṣṭāṁ karī॒ṣi॑ṇīm |
ī॒śvarīṁ sarvabhūtā॒nāṁ॒ tāmi॒hopa॑hvaye॒
śriyam | | 9 | |

मन॑सः॒ काम॒माकू॑तिं॑ वा॒चः स॒त्यम॑शीमहि।

प॒शू॒नां रू॒पमन्न॑स्य॒ मयि॒ श्रीः श्र॑यतां॒ यशः॑॥ १०॥

mana॑saḥ॒ kāma॒mākū॑tiṁ॑ vā॒caḥ
sa॒tyamaśīmahi |
pa॒śū॒nāṁ rū॒pamanna॑sya॒ mayi॒ śrīḥ
śrayatāṁ॒ yaśa॑ḥ | | 10 | |

क॒र्दमे॑न प्र॑जाभू॒ता॒म॒यि॒ सम्भ॑वक॒र्दम।

श्रियं वा`सय मे कु`ले मा`तरं पद्म`मालिनीम्॥ ११॥

ka`rdamena prajābhū`tā`ma`yi` sambhavaka`rdama ।
śriyaṁ vā`saya me ku`le mā`taraṁ padma`mālinīm ।। 11 ।।

आपः सृ`जन्तु स्नि`ग्धा`नि` चि`क्ली`तवसमे` गृहे।

निचदे`वीं मा`तरं` श्रियं वा`सय मे कु`ले॥ १२॥

āpaḥ sṛ`jantu sni`gdhā`ni` ci`klī`tavasame` gṛhe ।
nicade`vīṁ mā`taraṁ` śriyaṁ vā`saya me ku`le ।। 12 ।।

आ`र्द्रां पु`ष्करिणीं पु`ष्टिं सु`वर्णां हेम`मालिनीम्।

सू`र्यां हि`रण्मयीं ल`क्ष्मीं जातवेदो म` आवह॥ १३॥

ā`rdrāṁ pu`ṣkariṇīṁ pu`ṣṭiṁ su`varṇāṁ hema`mālinīm ।
sū`ryāṁ hi`raṇmayīṁ la`kṣmīṁ jātavedo ma` āvaha ।। 13 ।।

आ`र्द्रां यः` करिणीं य`ष्टिं पि`ङ्गलां पद्म`मालिनीम्।

च`न्द्रां हि`रण्मयीं ल`क्ष्मीं जातवेदो म` आवह॥ १४॥

ā`rdrāṁ yaḥ` kariṇīṁ ya`ṣṭiṁ pi`ṅgalāṁ padma`mālinīm ।
ca`ndrāṁ hi`raṇmayīṁ la`kṣmīṁ jātavedo ma` āvaha ।। 14 ।।

तां म` आवह` जातवेदो ल`क्ष्मीमनपगा`मिनीम्।

यस्यां` हिरण्यं` प्रभूतं` गावोदा`स्योऽश्वान्वि`न्देयं`

पुरुषान`हम्॥ १५॥

tāṁ ma` āvaha` jātavedo la`kṣmīmanapagā`minīm ।
yasyāṁ` hiraṇyaṁ` prabhūtaṁ` gāvodā`syo'śvānvi`ndeyaṁ` puruṣāna`ham ।। 15 ।।

यः शुचिः` प्रयतो भू`त्वा जु`हुयादाज्य`मन्वहम्।

सूक्तं प`ञ्चदशर्चं` च श्री`कामः सत`तं जपेत्॥ १६॥

yaḥ śuciḥ` prayato bhū`tvā ju`huyādājya`manvaham ।
sūktaṁ pa`ñcadaśarcaṁ` ca śrī`kāmaḥ sata`taṁ japet ।। 16 ।।

पद्मान`ने पद्म ऊरू` प`द्मा`क्षी पद्म`सम्भवे।

तन्मेभ`जसि प`द्मा`क्षी` ये`न सौख्यं ल`भाम्यहम्॥ १७॥

padmāna`ne padma ūrū` pa`dmā`kṣī padma`sambhave ।
tanmebha`jasi pa`dmā`kṣī` ye`na saukhyaṁ la`bhāmyaham ।। 17 ।।

अश्वदा`यी गोदा`यी` ध`नदायी म`हाधने।

धनं मे` जुषतां दे`वि` स`र्व`कामांश्च` देहि मे॥ १८॥

aśvadā`yī godā`yī` dha`nadāyī ma`hādhane ।
dhanaṁ me` juṣatāṁ de`vi` sa`rva`kāmāṁśca` dehi me ।। 18 ।।

पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि।

विश्वप्रिये विश्वमनोनुकू`ले त्वत्पादप`द्मं मयि संनिधत्स्व॥

१९॥

padmānane padmavipadmapatre padmapriye padmadalāyatākṣi ।
viśvapriye viśvamanonukū`le tvatpādapa`dmaṁ mayi saṁnidhatsva ।। 19 ।।

पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथम्।

प्रजानां भवसि माता आयुष्मन्तं करोतु मे॥ २०॥

putrapautraṁ dhanaṁ dhānyaṁ hastyaśvādigaveratham ।
prajānāṁ bhavasi mātā āyuṣmantaṁ karotu me ।। 20 ।।

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।

धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते॥ २१॥

dhanamagnirdhanaṁ vāyurdhanaṁ sūryo dhanaṁ vasuḥ ।
dhanamindro bṛhaspatirvaruṇaṁ dhanamastu te ।। 21 ।।

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा।

सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥ २३॥

vainateya somaṁ piba somaṁ pibatu vṛtrahā ।
somaṁ dhanasya somino mahyaṁ dadātu sominaḥ ।। 23 ।।

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।।

भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्॥ २४॥

na krodho na ca mātsaryaṁ na lobho nāśubhā matiḥ । ।
bhavanti kṛtapuṇyānāṁ bhaktānāṁ śrīsūktaṁ japet ।। 24 ।।

सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे।

भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्॥

२५॥

sarasijanilaye sarojahaste dhavalatarāṁśukagandhamālyaśobhe ।
bhagavati harivallabhe manojñe tribhuvanabhūtikari prasīda mahyam ।। 25 ।।

विष्णुपत्नीं क्षमादेवीं माधवीं माधवप्रियाम्।

लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्॥ २६॥

viṣṇupatnīṁ kṣamādevīṁ mādhavīṁ mādhavapriyām ।
lakṣmīṁ priyasakhīṁ devīṁ namāmyacyutavallabhām ।। 26 ।।

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि।

तन्नो लक्ष्मीः प्रचोदयात्॥ २७॥

mahālakṣmī ca vidmahe viṣṇupatnī ca dhīmahi ।
tanno lakṣmīḥ pracodayāt ।। 27 ।।

श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।

धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ २८॥

śrīvarcasvamāyuṣyamārogyamāvidhācchobhamānaṁ mahīyate ।
dhānyaṁ dhanaṁ paśuṁ bahuputralābhaṁ śatasaṁvatsaraṁ dīrghamāyuḥ ।। 28 ।।

श्रिये जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु।

श्रियं वसाना अमृतत्वमायन् भजन्ति सद्यः सविता विदध्यून्॥

श्रिय एवैनं तच्छ्रियामादधाति।

सन्ततमृचावषट् कृत्यंसंधत्तं सधीयते प्रजया पशुभिः॥

य एवं वेद।

śriye jāta śriya āniryāya śriyaṁ vayo janitṛbhyo dadhātu ।
śriyaṁ vasānā amṛtatvamāyan bhajanti sadyaḥ savitā vidadhyūn ।।
śriya evainaṁ tacchriyāmādadhāti ।
santatamṛcāvaṣaṭ kṛtyaṁsaṁdhattaṁ sadhīyate prajayā paśubhiḥ ।।
ya evaṁ veda ।

ॐ महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि।

तन्नो लक्ष्मीः प्रचोदयात्॥

om mahālakṣmī ca vidmahe viṣṇupatnī ca dhīmahi ।
tanno lakṣmīḥ pracodayāt ।।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

।। om śāntiḥ śāntiḥ śāntiḥ ।।

# दुर्गासूक्तम्

॥ अथ दुर्गा सूक्तम् ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।

स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ १॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं

कर्मफलेषु जुष्टाम्। दुर्गां देविं शरणमहं

प्रपद्ये सुतरसि तरसे नमः॥ २॥

अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा।

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ ३॥

विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि।

अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ ४॥

पृतना जितं सहमानमुग्रमग्निं हुवेम परमाथ्सधस्थात्।

स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः॥ ५॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।

स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ ६॥

गोभिर्जुष्टमयुजो निषिक्तन्तवेन्द्र विष्णोरनुसंचरेम।

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्॥ ७॥

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥

durgāsūktam

|| atha durgā sūktam ||

om jā`tavedase sunavāma` soma marātīya`to nidahāti` vedaḥ |
sa naḥ parṣa`dati du`rgāṇi` viśvā nā`veva` sindhuṁ duri`tā'tya`gniḥ || 1||
tāma`gnivarṇāṁ` tapasā jvala`ntīṁ vairoca`nīṁ
karmapha`leṣu` juṣṭā"m | du`rgāṁ de`viṁ̐ śaraṇama`haṁ
prapadye su`tarasi tarase` namaḥ || 2||
agne` tvaṁ pārayā` navyo a`smānthsva`stibhi`rati du`rgāṇi` viśvā" |
pūśca pṛ`thvī bahu`lā na u`rvī bhavā to`kāya` tanayāya` śaṁyoḥ || 3||
viśvāni no du`rgahā jātaveda`ḥ sindhu`nna nā`vā duri`tā'tiparṣi |
agne atri`vanmanasā gṛṇā`no"'smākaṁ bodhyavi`tā ta`nūnā"m || 4||
pṛ`ta`nā` jita`ṁ̐` sahamānamu`grama`gniṁ̐ huvema para`māthsa`dhasthā"t |
sa naḥ parṣa`dati du`rgāṇi` viśvā` kṣāmadde`vo ati duri`tātya`gniḥ || 5||
pra`tnoṣi ka`mīḍyo adhva`reṣu sa`nācca` hotā` navyaśca` sathsi |
svāñcā"gne ta`nuvaṁ pi`prayasvā`smabhyaṁ ca` saubhaga`māyajasva || 6||
gobhi`rjuṣṭama`yujo` niṣikta`ntave"ndra viṣṇo`ranusaṁcarema |
nākasya pṛ`ṣṭhama`bhi saṁ`vasāno` vaiṣṇavīṁ lo`ka i`ha mādayantām || 7||
om kā`tyā`ya`nāya vi`dmahe kanyaku`māri dhīmahi | tanno durgiḥ praco`dayā"t ||

## ॥ इति दुर्गा सूक्तम् ॥

|| iti durgā sūktam ||

## ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||

# विष्णुसूक्तम्॥

## viṣṇusūktam।।

ॐ विष्णो`र्नुकं वी`र्याणि` प्रवोच`ं यः पार्थिवानि विम`मे रजाꣳसि` यो अस्कभाय`दुत्तरꣳ स`धस्थं विचक्रमा`णस्त्रे`धोरुगा`यो विष्णोर`राटमसि` विष्णो"ः पृ`ष्ठमसि` विष्णो`ः श्नप्त्रे"स्थो` विष्णो`स्स्यूरसि` विष्णो"र्ध्रु`वमसि वैष्ण`वमसि` विष्णवे त्वा॥

om viṣṇo`rnukaṁ vī`ryāṇi` pravoca`ṁ yaḥ pārthivāni vima`me rajāꣳsi` yo askabhāya`duttaraꣳ sa`dhasthaṁ vicakramā`ṇastre`dhorugā`yo viṣṇora`rāṭamasi` viṣṇo"ḥ pṛ`ṣṭhamasi` viṣṇo`ḥ śnaptre"stho` viṣṇo`ssyūrasi` viṣṇo"rdhru`vamasi vaiṣṇa`vamasi` viṣṇave tvā।।

तदस्य प्रि`यम`भिपाथो अश्याम्। नरो` यत्र देव`यवो` मदन्ति। उ`रु`क्र`मस्य` स हि बन्धुरि`त्था। विष्णो"ः प`दे पर`मे मध्व` उत्थ्सः। प्रतद्विष्णुस्स्तवते वी`र्याय। मृ`गो न भी`मः कुच`रो गिरि`ष्ठाः। यस्यो`रुषु त्रि`षु वि`क्रमणेषु। अधिक्शि`यन्ति` भुवनानि` विश्वा"। प`रो मात्रया त`नुवा वृधान। न ते महि`त्वमन्वश्नुवन्ति॥

tadasya pri`yama`bhipātho aśyām। naro` yatra deva`yavo` madanti। u`ru`kra`masya` sa hi bandhuri`tthā। viṣṇo"ḥ pa`de para`me madhva` utthsaḥ। pratadviṣṇusstavate vī`ryāya। mṛ`go na bhī`maḥ kuca`ro giri`ṣṭhāḥ। yasyo`ruṣu tri`ṣu vi`kramaṇeṣu। adhikśi`yanti` bhuvanāni` viśvā"। pa`ro mātrayā ta`nuvā vṛdhāna। na te mahi`tvamanvaśnuvanti।।

उ`भे ते विद्म` रजसि पृथि`व्या विष्णो देव`त्वम्। प`र`मस्य विथ्से। विचक्रमे पृथि`वीमे`ष ए`ताम्। क्शेत्राय` विष्णु`र्मनुषे दश`स्यन्। ध्रु`वासो अस्य की`रयो` जनासः।

उ`रु`क्शि`तिꣳ सु`जनिमाचकार। विचक्रमे श`तर्चसं महि`त्वा। प्रविष्णुरस्तु त`वस`स्तवीयान्।

त्वे`षꣳह्यस्य` स्थविरस्य` नाम॥

u`bhe te vidma` rajasi pṛthi`vyā viṣṇo deva`tvam। pa`ra`masya vithse। vicakrame pṛthi`vīme`ṣa e`tām। kśetrāya` viṣṇu`rmanuṣe daśa`syan। dhru`vāso asya kī`rayo` janāsaḥ। u`ru`kśi`tiꣳ su`janimācakāra। vicakrame śa`tarcasaṁ mahi`tvā। praviṣṇurastu ta`vasa`stavīyān।

tve`ṣaꣳhyasya` sthavirasya` nāma।।

अतो दे`वा अवन्तुनो` यतो` विष्णुर्विचक्र`मे। पृ`थि`व्यास्स`प्त धामभिः। इ`दं विष्णु`र्विचक्रमे त्रे`धा निदधे प`दम्। समूढमस्य पाꣳसु`रे। त्रिणि प`दा विचक्रमे` विष्णुर्गो`पा अदा"भ्यः।

ततो` धर्माणि धा`रयन्। विष्णो`ः कर्माणि पश्यत` यतो" व्र`तानि पस्प`शे। इन्द्रस्य` युज्य`स्सका"॥

ato de`vā avantuno` yato` viṣṇurvicakra`me। pṛ`thi`vyāssa`pta dhāmabhiḥ। i`daṁ viṣṇu`rvicakrame tre`dhā nidadhe pa`dam। samūḍhamasya pāꣳsu`re। triṇi pa`dā vicakrame` viṣṇurgo`pā adā"bhyaḥ।

tato` dharmāṇi dhā`rayan। viṣṇo`ḥ karmāṇi paśyata` yato" vra`tāni paspa`śe। indrasya` yujya`ssakā"।।

तद्विष्णो"ः पर`मं प`दꣳ सदा पश्यन्ति सू`रयः। दि`वीव` चक्शु`राततम्। तद्विप्रासो विप`न्यवो जागृ`वाꣳ स`स्समिन्धते।

विष्णो॑र्यत्प॑र॒मं प॒दम्। पर्या॒प्त्या अन॑न्तरायाय॒ सर्व॑स्तोमोऽति रा॒त्र उ॑त्त॒म मह॑र्भवति॒ सर्व॒स्याप्त्यै॒ सर्व॑स्य॒ जित्यै॒ सर्व॑मे॒व

तेना॒प्नोति॒ सर्वं॑ जयति॥

tadviṣṇo"ḥ para`maṁ pa`dam̐ sadā paśyanti sū`rayaḥ। di`vīva` cakśu`rātatam। tadviprāso vipa`nyavo jāgṛ`vām̐ sa`ssamindhate। viṣṇo`ryatpara`maṁ pa`dam। paryā"ptyā anantarāyāya` sarvastomo'ti rā`tra utta`ma maharbhavati` sarva`syāptyai` sarvasya` jityai` sarvame`va tenā"pnoti` sarvaṁ jayati।।

॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

।। om śānti`ḥ śānti`ḥ śāntiḥ ।।